रसविलासः

४०५

409

रस विलासः

कुमलरुदेवः

F. 57

ॐ संकपरवेगरा

22.12.92

रसस्वरूपनिरूपणं १०

रसनवकस्य पृथक्पृथगुदाहरणानि २६

त्रयस्त्रिंशत्संख्यव्यभिचारिभावलक्षणादि ३०

गुणाः ३५

रसदोषाः ४०

रसदोषोद्धारः ४३ का. ब्या १० १४००

काव्यलक्षणं शक्तिलक्षणं व्यंजनाश्च ५०

॥श्रीपार्श्वचंद्रसद्गुरुभ्यो नमः॥श्रीगणेशाय नमः॥ चारुकाव्यसमुत्पन्नमनोहृत्या
१ विनाशिते। अज्ञानांकुरमव्याद्दात्मा नवरसात्मकः॥१ इह तावत्कालिदासादीना
मिव यशो विस्तारादनेकश्रेयःसाधनीभूतकाव्यस्य शब्दार्थौ शरीरपदे निक्षिप्तौ य
मकारस्य शब्दशोभाधायकत्वेन उपमादयश्चार्थोत्कर्षाधायकत्वेनालंकारा हारा
दिस्थानीयाः वस्त्वलंकाररसादिरूपं व्यंग्यं चात्मा ओजःप्रसादमाधुर्याख्यास्त्रयो गुणा
ः शौर्यादिवदात्मविशेषरसाद्याश्रिता इति व्यवस्थिते प्रायः स्नो रसार्थमिमे च काव्य
प्रवृत्तेः ध्वनिषु परमरमणीयत्वाच्च रसध्वनेस्तदात्मा रसस्तावदभिधीयते तदुक्तं
दिना स्वादु पाकेप्यनास्वाद्यं भोज्यं निर्लवणं यथा तथैव नीरसं काव्यं स्यान्नो रसिकतु
ष्टये इति। ध्वनिकारोपि आह। नीरसो हि निबंधो यः सायशब्दो महाकवेः स तेनाकविरे शिवः
व स्यादन्येनास्मृतलक्षण इति। तत्र रसस्वरूपमाह। काव्यप्रकाशकृतः। कारणा १
न्यथ कार्याणि सहकारीणि यानि च रसादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।

विभावा अनुभावास्तत्कथ्यंते व्यभिचारिणः। व्यक्तः सतैर्विभावाद्यैः स्थायिभावो रसः

स्मृत इति २ अथेति समुच्चये॥ कारणानि प्रमदेंदूदयादीनि कारकोद्दीपकरूपाणि का

र्याणि स्वेदः स्तंभोथ रोमांचः स्वरभंगोथ वेपथुः। वैवर्ण्यमश्रुप्रलाप इत्यष्टौ सात्विका

मताः। वाङ्मनोबुद्धिशरीरभंगरूपाणि च कटाक्षभुजक्षेपादीनि। सहकारिणि तेषु जन्

यितव्येषु उत्कंठादीनि विभावाः आलंबनोद्दीपनरूपाः चेत्सपदस्यार्थः। तत्त्वदित्यर्थ

ः यद्यप्युद्दीपकस्य स्थायिनिन कारणत्वं किंत्वस्पन्नेतस्मिन्नीषदुत्कत्वोपचारात्त त

त्रापि विभावव्यवहारः विभावादिसंज्ञा च विभावनादिव्यापारायोगात्तत्तद्यथा वासना

रूपतया स्थितान् रत्यादीन् स्थायिनो विभावयंति रसास्वादांकुरयोग्यतां नयंतीति वि

भावाः अनुभावयंति च तानित्यनुभावाः। पोषकतया विशेषेणाभितः काये स्थायि

नं चारयंति विशेषेणाभिमुख्येन चरंतीति वा व्यभिचारिणः व्यक्तः चर्वणाविशिष्टः

सतैरिति यस्य यस्य यानि कारणादीनि तैस्तज्जातीयैरित्यर्थः। स्थायिलक्षणं तु विरु

द्वैरविरुद्धैर्वाभावैर्विच्छिद्यतेनयः।आत्मभावंनयत्यन्यान्सस्थायीलवणाकरइतिदं
२ दृ॥जयदेवोप्याहसजातीयविजातीयैरनिरस्कृतमूर्त्तिमान्॥यावद्रसंवर्त्तमानः
स्थायीभावउदाहृतःइति॥प्रदीपकारोप्याह॥ विरुद्धाअविरुद्धावायंतिरोधातुमक्ष
माः आनंदांकुरकंदोसौभावःस्थायीपदास्पदमिति।चिरंचित्तेऽवतिष्ठंतेसंबध्यंते
ऽनुबंधिभिः।रसत्वंयेप्रपद्यंतेप्रसिद्धाःस्थायिनोत्रते इतिश्रीवत्सलांछनः।चिरमि
तिव्यभिचारिवारणाय। इत्थंचसमुचितललितसंनिवेशचारुणाकाव्येनसमर्पितैः
सहृदयहृदयंप्रविष्टैस्तदीयसहृदयतासहकृतेनभावनाविशेषमहिम्नाविगलित
दुष्यंतरमणीयत्वादिभिरलौकिकविभावानुभावव्यभिचारिशब्दव्यपदेश्यैःशकुं
तलादिभिरालंबनकारणैश्चंद्रिकादिभिरुद्दीपनकारणैरश्रुपातादिभिःकार्यैश्चिंतादिभिः शिवः
सहकारिभिश्चसंभूयप्रादुर्भावितेनालौकिकेनव्यापारेणतत्कालनिवर्त्तितानंदांशावर २
णाज्ञानेनातएवप्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेणप्रमात्रास्वप्रकाशतयावा

स्त्वेननिजस्वरूपानंदेनसहगोचरीक्रियमाणःप्राग्विनिविष्टवासनारूपोरत्यादिरे
वरत्याद्यवच्छिन्नंचैतन्यंवारसः प्राग्विनिविष्टइत्यनेनचात्मतात्मतयानुवर्त्तमानइत्यु
क्तंवेति अतएववासनायाअभावान्नवैयाकरणवैदिकश्रोत्रियाणांरसास्वादः तदुक्तं
श्रीवत्सलांछनेन।सवासनानांसभ्यानांरसस्यास्वादनंभवेत् निर्वासनाःशाब्दिका
ग्र्याःकाष्ठलोष्ठाश्मसन्निभाः। अतएवसन्न्यासिनांनशृंगारास्वादः।—रागिणांच
नशांतरसास्वादःइतिव्यवस्थाइतिकाव्यप्रकाशास्वारस्यं।विभावस्वरूपमुक्तमग्नि
पुराणे।विभाव्यतेहिइत्यादिर्यत्त्रयेनविभाव्यते। विभावोनामसद्विधालंबनोद्दीय
नात्मकःसाहित्यदर्पणेपि।आलंबनोनायकादिस्तमालंब्यसौरेदयात्।आलंबन
विभावोयथा।चित्तेनिवेश्यपरिकल्पितसत्वयोगारूपोच्चयेनविधिनामनसाकृतानु।
स्त्रीरत्नसृष्टिरपराप्रतिभातिसामेधातुर्विभुत्वमनुचिंत्यवपुश्चतस्याः उद्दीपनवि
भावास्तेरससमुद्दीपयंतिये इति उद्दीपनविभावोयथा।उद्देशोयंसरसकदलीश्रेणी।

ङ्गोभाति शायीर्त्तं जोत्स्नाघोत्कुरितरमणीविभ्रमो नर्मदायाः। किं चैतास्मिन्सुरतसुहृदस्त
३ न्वित्तिवांतिवातायेषामग्रेसरति कल्पिताकांडकोपो मनोस्तः अनुभावलक्षणमाहृदं
डी। अनुभावो विकारस्तु भावसंसूचनात्मक इति अनुभावो यथा। पीत्यामुकुर्वधित
3 कंधरमाननं तदाव्रन्त्तहृतंतम्रातपत्रनिभं वहंत्याः। दग्धो मृतेन गरलेन च यपक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कराक्षः इति। साहित्यदर्पणेपि उद्बुद्धं कारणैः स्वैः स्वैर्बहि
र्भावं प्रकाशयन् लोके यः कार्यरूपः सोनुभावः काव्यनाट्ययोरिति। सात्त्विकास्त्वितरं
गतता एव। तेषामपि इत्यादिकार्यत्वात्। भिन्नतया प्रतिपादनं तु नियतकारणसत्वज
नितत्वात्। तल्लक्षणं तु रजस्तमोभ्यामस्पृष्टं मनः सत्वमिहोच्यते। निर्वृत्तये स्य तद्यो
गात्प्रभवंतीति सात्विका इति। अस्य रसस्येति प्रकृतपरामर्शः। सात्विका यथा। ।शिवः
वारं वारं तिरयति दृशावुद्गतो बाष्पपूरस्तत्संकल्पोपहितजडिमस्तंभमभ्येति गात्रं ३
। सद्यः स्विद्यन्नयमविरतोत्कंपलोलांगुलीकः पाणिर्लेखाविधुसुनितरां वर्त्तते किंक

रोमि व्यभिचारि लक्षणमाह दंडी विशेषादाभिमुख्येन चरंतो व्यभिचारिणः। स्थायिन्यु
न्मग्ननिर्मग्नाः कल्लोला इव वारिधौ। वारिधौ सत्येव कल्लोला यथा उन्मज्जननिमज्जने
कुरुतस्तथा स्थायिनि सततप्रवाहापन्ने सत्येव ये चित्तवृत्तिविशेषा उपायान्त्यपया
न्ति च ते व्यभिचारिभावा इत्यर्थः तथा चोक्तम्। ये त्वपकर्तुमायान्तीति स्थायिनं रसमु
त्तमं। उपकृत्य च गच्छन्ति ते मता व्यभिचारिण इति। अवस्थितिश्चैषां फेनबुद्बुदन्यायेन
स्थायिनां तु स्रक्सूत्रन्यायेनेति भेदः। उदाहरणं यथा मम विषमः समयः खलाः सप
त्न्यः प्रतिरंध्रं प्रहरन्ति यान्तरोपि। अदयो दयितः शुनीन नोदा मम मा चं चलचापलं वि
धेहि विषम इति मतिः। खला इत्यसूया। प्रतिरंध्रं इति दैन्यं। अदय इति त्रासः। शुनी
ति स्मृतिः मा च चंचलेति शंका एतैर्व्यभिचारिभावैर्नायिकानिष्ठाया उपनायकसमवेता
रतिः साकांक्ष संचार्यते पोष्यते इति यावत्। अथ विभावादयो मिलिताः किमिति व्यंजक
त्वेन निर्दिष्टा इति चेत् एकैकस्य व्यंजकत्वे व्यभिचारादिति गृहाण। अथैकैकस्मादप्य

न्यच्छ्याक्षेपाद्व्यस्तिरसव्यक्तिरित्यव्यभिचार इति चेन्न व्याघ्रादयो विभावा भयानकस्ये
८ वरौद्राद्भुतवीराणां अश्रुपातादयोऽनुभावाः शृंगारस्येव करुणभयानकयोः चिंताद
५ यो व्यभिचारिणः शृंगारस्येव वीरकरुणभयानकानां इत्यन्यच्छायाक्षेपानियमात्।
नन्वेवं मिलितस्यैव व्यंजकत्वे एकैकोपस्थितौ रसव्यक्तिर्न स्यात् दृश्यते चासौ। यथा।
वियदलिमलिनांबुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः। धरणिरभिनवांकु
रांकटंका प्रणतिपरे दयिते प्रसीद मुग्ध इत्यादौ कामिनीसमवेताया रतेरालंबनस्य
दयितमात्रस्य दयितसमवेतरतेरालंबनस्य कामिनीमानस्य मेघावरणकोकिलारा
वनवांकुराणां उद्दीपकमात्राणां चोपस्थितेरेवं परिमृदितमृणालीम्लानमंगं प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु। कलयति च हिमांशोर्निःकलंकस्य लक्ष्मीम
भिनवकरिदंतच्छेदकांतः कपोल इत्यादौ। अंगमालिन्यचेतःशून्यतामुखवैवर्ण्यस्याद्य ८
नुभावमात्रस्य। दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं संश्लिष्यत्यरुणं गृही

नवसने किंचांचितभ्रूलतं मानिन्याश्चरणानतिव्यतिकरे बाष्पांबुपूर्णेक्षणं चक्षुर्जा
तमहो प्रपंचचतुरं जातागसि प्रेयसी त्यादौ उत्सुकादिविशेषणव्यंग्यानामौत्सुक्यलज्जा
हर्षकोपासूयाप्रसादानां व्यभिचारिमात्राणां यद्यप्यत्र प्रेयसीत्याद्यालंबनविभावो
प्यस्ति तथापि रत्यनुकूलधर्मवृत्तयाऽनिर्दिष्टत्वान्नास्ति कल्पएवेति मेवं एषां विभावा
दीनामसाधारण्येपनान्यदाक्षेपकत्वे नात्रापि मिलितानामेव व्यंजकत्वात् अथोत
यद्यसाधारणास्तर्हि किमन्यद्वयाक्षेपेण एकैकव्याभिचारि होत्रयापेक्षायदि साधार
ण्यमेवैषां कथं तर्हि द्वयोर्विशेषयोग्यविभावाद्याक्षेपकत्वमिति उच्यते एकैकस्य व्य
भिचारात् मिलितानां व्यंजकत्वे स्थितेऽसाधारण्येनापीतरन्द्वयमाक्षिप्यते किंच र
सस्य विभावादिसमूहालंबनरूपत्वादेकैकस्मादसाधारण्यादपि व्यक्त्यभावात् मिलि
तानामेव व्यंजकत्वं अतोऽसाधारण्येनापीतरन्द्वयमाक्षिप्यते। ततो मिलितैस्त
दभिव्यक्तिरिति ते च शृंगारहास्यकरुणरौद्रवीरभयानकाः बीभत्साद्भुतसंज्ञौ चेत्य

ष्टौ नाट्ये रसाः स्मृताः। अत्र केचित्। शान्तस्य शमसाध्यत्वान्नटे च तदसंभवात् अष्टावे
५ व रसा नाट्ये न शान्तस्तत्र युक्त इत्याहुः तच्च न नटे शमाभावात् इति हि त्वसंगतः नटे
रसाभिव्यक्तेरस्वीकारात् सामाजिकानां शमवत्त्वेन तत्र रसोद्बोधे बाधकाभावात्
न च नटस्य शमाभावात्तदभिनयप्रकाशकत्वानुपपत्तिरिति वाच्यं। तस्य भयक्रो
धादेरप्यभावेन तदभिनयप्रकाशकतायां अप्यनुपपत्तेः। यदि च नटस्य क्रोधादे
रभावेन वास्तवतत्कार्याणां वधबंधादीनामुत्पत्त्यसंभवेपि कृत्रिमतत्कार्याणां
शिक्षाभ्यासादित उत्पत्तौ नास्ति बाधकमिति निरीक्ष्यते। तदा प्रकृतेपि दीयतां दृ
ष्टिः। अथ नाट्ये गीतवाद्यादीनां विरोधिनां सत्त्वात्सामाजिकेष्वपि विषयवैमुख्या
त्मनः शान्तस्य कथमुद्रेक इति चेत् नाट्ये शान्तरसमभ्युपगच्छद्भिः फलबलात्तद्गी शिवः
तवाद्यादेरप्यविरोधित्वस्वीकारात्। विषयसामान्यस्य तत्राविरोधित्वस्वीकारे ५
तदीयालंबनस्य संसारानित्यत्वस्य तदुद्दीपनस्य पुराणश्रवणसत्संगपुण्याव

नतीर्थोचलोकनादेरपि विषयत्वेन विरोधित्वापत्तेः अतएव काव्यादर्शे दंडिना।
अष्टावेव रसा नाट्येष्विति केचिदचूचुदन्। तन्न चारु यतः। कंचिन्न रसं स्वदते नट
इत्यादिना शांतोपि नवमो रस इति व्यवस्थापितं। यैरपि तद्रूपे नाटकादौ शांतरसो ना
स्तीत्यभ्युपेयते तैरपि बाधकाभावात् काव्ये भरतादिप्रबंधे काव्ये च शांतरसोनुप
द्रवः तथा च निर्वेदस्थायिभावान्तः शांतोपि नवमो रस इति सिद्धं॥ अमीषां च स्था
यिभावाः रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चैव निर्वेद
श्चेति ते नव रसेभ्यः स्थायिभावानां घटावच्छिन्नाकाशात् घटानामिव भेदः। ननु र
सः सुखात्मक इति प्रतिपादितं तत्कथं दुःखमयः करुणादिको रस इति चेन्न लोके
तथात्वेपि काव्यादौ पार्यंतिकालौकिकसुखोदयात् अन्यथा प्रेक्षावतोमिप्रेहप्र
वृत्तेः। एतेषां लक्षणानि प्रागुक्तानि। केचित्तु रत्याद्यन्यतमत्वं स्थायित्वमिति तन्न
रत्यादीनामेकस्मिन्नप्ररूढेन्यस्याप्ररूढस्य व्यभिचारित्वोपगमात् प्ररूढाप्ररूढत्वे

चन्द्रस्य विभावजत्वे। तदुक्तं रत्नाकरे रत्यादयः स्थायिभावाः स्युर्भूयिष्ठविभावजाः
६ स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिण इति एवं च वीररसे प्रधाने क्रोधो रौद्रे चोत्सा
ह शृंगारे हासो व्यभिचारी तत्र स्त्रीपुंसयोरन्योन्यालंबनः प्रेमाख्यः चित्तवृत्तिविशेषो
रतिः स्थायिभावः गुरुदेवविप्रनृपपुत्राद्यालंबनव्यभिचारी पुत्रादिवियोगमरणादि
जन्मा वैक्लव्याख्यश्चित्तवृत्तिविशेषः शोकः दंपत्योस्तु वियोगे जीवित्वज्ञानदशा
यां वैक्लव्ये प्रोषितायां रतेरेव प्राधान्यात् शृंगारो विप्रलंभाख्यो रसः वैक्लव्यं व्यभि
चारि मृतत्वज्ञानदशायां तु रतिपुष्टवैक्लव्यस्यैव प्राधान्यात्करुणः यद्यात्तु सत्यपि
मृतत्वज्ञाने देवताप्रसादादिना पुनरुज्जीवनज्ञानं कथंचित्स्यात्तदालंबनस्यात्यंति
कनिरासाभावात् चिरप्रवासस्थ एव विप्रलंभ एव न करुणः नित्यानित्यवस्तुविचारज शिवः
न्मा विषयविरागाख्यो निर्वेदः स्थायी गृहकलहादिजस्तु व्यभिचारी गुरुबंधुबंधा ६
दिपरमापराधजन्मा प्रज्वलनाख्यः चित्तवृत्तिविशेषः क्रोधः। अयं च परविनाशा

दिहेतुः स्वकृतापराधजन्मा तु परुषवचनासंभाषणादिहेतुरयमेवामर्षाख्यो व्यभिचा
री परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्यः चित्तवृत्तिविशेष उत्साहः अर्जनादि
विषयस्तु व्यभिचारी अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्या वृत्तिविशेषो वि
स्मयः। अलभ्यपुत्रादिलाभजस्तु व्यभिचारी। वागंगादिविकारदर्शनजन्मा विकासा
ख्या वृत्तिविशेषो हासः। वातुलचरितावलोकनादिजन्मा व्यभिचारी व्याघ्रदर्शना
दिजन्मा परमानर्थविषयको वैक्लव्याख्यः सभयं परमानर्थविषयकत्वाभावे तु
स एव त्रासो व्यभिचारीति अपरे तु औत्पातिकप्रभवः त्रासः स्वापराधोत्थं भयमिति
भयत्रासयोर्भेदमाहुः कदर्यवस्तुविलोकनजन्मा विचिकित्साख्यः चित्तवृत्तिविशे
षो जुगुप्सा अभक्ष्यादिदर्शनजन्मा व्यभिचारीति विवेकः एवमेषां स्थायिभावानाम
ध्ये रतेः स्त्रीपुंसौ आलंबने। चंद्रिकावसंतविविधोपवनरहःस्थानादय उद्दीपनवि
भावाः तन्मुखावलोकनतद्गुणश्रवणकीर्तनादयोऽन्ये सात्त्विकभावाश्चानुभावाः

स्मृतिचिंतादयोव्यभिचारिणः करुणस्यबंधुनाशादयःआलंबनानितत्संबंधिगृहतु
७ रणाभरणदर्शनादयस्तत्कथाश्रवणादयश्चोद्दीपकाः गात्रक्षेपाश्रुपातादयोऽनुभा
7 वाः ग्लानिश्रममोहविषादचिंतौत्सुक्यदीनताजडतादयोव्यभिचारिणः शांतस्या
नित्यत्वेनज्ञातंजगदालंबनं वेदांतश्रवणतपोवनतापसदर्शनाद्युद्दीपनंविषयारु
चिशत्रुमित्राद्यौदासीन्यचेष्टाहानिनासाग्रदृष्ट्यादयोनुभावाः हर्षोन्मादस्मृतिमत्या
दयोव्यभिचारिणः रौद्रस्यापकारकपुरुषादिरालंबनंतत्कृतापराधादिरुद्दीपकः व
धबंधादिफलकोनेत्रारुणदंतपीडनपरुषभाषणशस्त्रग्रहणादिरनुभावः। श्रम
र्षावेगोग्रताचापल्यादयःसंचारिणः एवंयस्याश्चित्तवृत्तेर्योविषयःसतस्याआलं
बनंनिमित्तानिचोद्दीपकानीत्यादिबोध्यमितिदिक्॥ ॥इतिश्रीमच्छुक्लभूदेवविर शिवः
चितेरसविलासेरसविवेकोनामप्रथमस्तबकः॥१॥ ॥शृंगारादीनांचलक्ष ७
णंरत्यादिप्रकृतिकत्वं तत्र। मनोनुकूलेष्वर्थेषु सुखसंवेदनंरतिः। रसोऽयस्त

त्प्रकृतिकः स शृंगारो द्विधा मतः संयोगकालावच्छिन्नारतिराद्य उदाहृतः वियोगका
लावच्छिन्नारतिरेव स तथापरः तदुक्तं प्रदीपकारैः अनुकूलौ निषेवेते यत्रान्योन्यं विला
सिनौ दर्शनस्पर्शनादीनि स संयोगो मुदान्वितः भावो यदा रतिर्नाम प्रकर्षमधिगच्छ
ति नाधिगच्छति चाभीष्टं विप्रलंभस्तदोच्यते इति संयोगश्च न दंपत्योः सामानाधिक
रण्यं एकतल्पशयनेपीर्ष्यादिसद्भावेन्न घ्यान्तरच्छदपटार्द्धकृतांतरालमुन्नालनि
श्वसितमुन्नपयोधराग्रं ईर्ष्यास्फुटाग्रसि विभिन्नतनोस्तनोन्तु सुप्तं रुषा शयनसीम्नि
शिवं शिवायाः इत्यादौ विप्रलंभस्यैव वर्णनात् एवं वियोगापि न वैयधिकरण्यं दोष
स्योक्तत्वात् तस्माद्द्वाविमौ संयोगवियोगाख्यावंतःकरणवृत्तिविशेषौ य संयुक्तौ
वियुक्तश्चास्मीति धीः अयं च शृंगारः परस्परालिंगनचुंबनादिभेदादपरिगणनीय इ
त्येक एव गण्यते तत्र संयोगो नायिकारब्धो नायकारब्धश्च क्रमेणोदाहरणम् शून्यं
वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य

यन्मुर्मुखंविश्रंभंपरिचुंब्यजातपुलकामालोक्यगंडस्थलीं लज्जानम्रमुखी प्रियेणहस
८ ताबालाचिरंचुंबिता आलोकेऽतिलज्जायाः समानकर्तृकं अत्रनायकः आलंबनंविव
क्तसुद्दीपकं मुखचुंबनाद्यनुभावः। लज्जादिकंव्यतिचारी तैरतेरत्यभिव्यक्तिः नायकार
ब्धोयथा त्वंमुग्धाक्षिविनैवकंचुकिकयाधत्सेमनोहारिणीं लक्ष्मीमित्यभिधायिनिप्रि
यतमेतद्वीटिकासंस्पर्शि। शय्योपांतनिविष्टसस्मितसखीनेत्रोत्सवानंदिनोनिर्यातः
शनकैरलीकवचनोपन्यासमालीजनः वीटिकावसनग्रंथिः अत्रनायिका आलंब
नं चरमचरणप्रतिपाद्यं विविक्तसुद्दीपकं वीटिकासंस्पर्शाद्यनुभावः प्रथमार्द्धव्यंग्य
हासश्चपलतादिकं व्यभिचारितैरतेर्नायिकाविषयायानायकसमवेतायाअभिव्यक्ति
रिति उभयारब्धोयथा। ह्रीतयापगतनीविनिरस्यन्नंतरीयमवलंबितकांचि। मंडली शिवः
कृतपृथुस्तनभारं सस्वजेदयितयाहृदयेशः वियोगः संगमस्तेपूर्वेद्यपूर्वश्चतत्राद्यो ८
ऽभिलाषहेतुक इत्युच्यते। अभिलाषपदेनतद्धेतोरनादिसंगमाभावस्यलक्षणात्त्र

आद्यस्तु क्वचिदीर्ष्ययाप्रणयेन वामानरूपः सईर्ष्याहेतुक उच्यते ईर्ष्यापदेनमानहे
तोरुपलक्षणात् क्वचित्तुकार्यवशाद्देशांतरप्रस्थितेः सप्रवासोऽभिधीयते उत्पद्यमानो
त्पत्स्यमानावपिप्रवासौस्वज्ञानद्वाराविप्रलंभप्रयोजकौ इतिनाव्याप्तिः प्रवासशब्देन
ज्ञानलक्षणाद्वा क्वचिच्च भयात् सचशापहेतुक उच्यते क्वचिदुक्तत्रितयातिरिक्ता
त्गुरुलज्जादितःकारणात् सएषविरहहेतुक इति व्यवह्रियते अभिलाषहेतुकोप्य
स्था प्रेमार्द्रः प्रणयस्पृशः परिचयादुद्गाढरागोदयास्तास्तामुग्धदृशोनिसर्गमधुराश्चे
ष्टाभवेयुर्मयियास्वतःकरणस्यबाह्यकरणव्यापाररोधीक्षणादाशंसापरिकल्पितास्व
पिभवत्यानंदसांद्रोलयः प्रेमस्नेहः सएवप्रकृष्टः प्रणयः सएवपरिचयातिशयेनरं
जनक्षमोरागः अयंचमालतीमाधवे माधववाक्यविन्यासः अत्रमालतीआलंब
नं तदीयसौंदर्यादिस्मरणमुद्दीपनं भवेयुरित्यादिपदसामर्थ्याक्षिप्तकातरावलोक
नचित्तलयादयोऽभावाः औत्सुक्यादयोव्यभिचारिणः तैः संयोगप्रागभावकाला

वच्छिन्नायारतेरभिव्यक्तिः यथा वा मम किमु कृतं सुकृतं ननु कुञ्जयायदुर्लतिसङ्क्रम
९ नाम्नि रुक्मिणीमिमां मदनदाहदवानलभर्जिता मदययादवनंदन नेक्षसे त्वमयं च मन्निर्मि
१ ते रुक्मिणीविलासे हरिमुद्दिश्य रुक्मिणीसख्या उपालंभः अत्र हरिरालंबनं कामज्वरा
दिकमनुभावः ग्लानिप्रभृतयो व्यभिचारिणः। तैर्भगवद्विषयया रुक्मिणीसमवेता
याः संयोगप्रागभावकालावच्छिन्नाया रतेरभिव्यक्तिः पूर्वपद्ये भवेयुरिति पदे नाहस्ये
वेच्छाया अभिव्यक्तेरभिलाषस्य प्राधान्यं। इह तु कथंचिद्गम्यमानत्वेपि संगमप्रागभा
वस्यैव प्राधान्यमिति पूर्वस्माद्भेदः ईर्ष्याहेतुको यथा सापत्सुः प्रथमापराधसमये सख्यो
पदेशं विना नो जानाति सविभ्रमांगवलनावक्रोक्तिसंसूचनं स्वच्छैरच्छकपोलमूलग
लितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः। अत्र ना शिवः
यक आलंबनं प्रथमापराध उद्दीपनं अश्रुपातादिरनुभावः व्रीडाविषादवितर्का ९
दयो व्यभिचारिणः आक्षिप्ताः तैः कामिनीसमवेताया रतेरभिव्यक्तिः॥ यथा वा मम।

त्वत्पादांबुजवैरिपंकजकुलंमुग्धेहसत्यंजसा।श्लिष्यंतिस्तनमंडलस्यपरियवस्त्रिचक्रवाक
द्विजाः॥म्लानियातित्तवास्यबंधुरधुनानाथोनिशायाश्चिरप्रेमातत्ताम्यतिकामुकस्तदपिते
नायैत्सहोदुर्ग्रहः अत्रनायकआलंबनं तदीयतनिमप्रयुक्ताऽन्यसपत्न्यपेक्षयाआत्म
नियतिभणयातिरेकभावनाउद्दीपनं तत्तेष्वनुनयेवैमुख्यादिकमनुभावः धैर्यादिकंव्य
भिचारिभिस्तैरभिव्यक्तिः। पूर्वंईर्षाहेतुः अत्रभयएणहेतुकइतिभेदः एवमग्रेपिबोध्यं
भविष्यत्प्रवासहेतुकोयथा प्रस्थानंवलयैकृतंप्रियसखैरस्त्रैरजस्त्रंगतंधृत्यानक्षणं
मासितंव्यवसितंचित्तेनगंतुंपुरः यातुंनिश्चितचेतसिप्रियतमेसर्वैसमंप्रस्थिताःगंत
व्येसतिजीवितप्रियसुहृत्सार्थःकिमुत्सृज्यते।यथावामम।प्राणाः प्राणपतिःसदागुरुप
राधीनोदिनवादिनद्वंद्वंचापिविलंघयास्यतिततःपथ्यंवचःश्रूयतांप्रस्थातुंसमयोप्य
मेवभवतांश्रेयस्करःसर्वथाचाग्रेयत्किलकोपिदेरनुचरौभर्तुःपरोभूयते भूतप्रवास
हेतुर्यथाममप्राणादपिप्रियतमंप्रियमालिपूर्वमक्रूरएवहृतवानधुनोद्धवोपिमा

लान्हरिष्यतिकिमित्यधिँवाधाराधाच कारकतिधासहसाविकल्पान् गोपिकासन्माना
१० यमथुरातोभगवताप्रेषितस्योद्धवस्यरथमक्रूररथसदृशंपश्यंत्याराधिकायावर्णनप्र
संगेत्रयंश्लोकः भवन्नहेतुकोयथामम।आषाढेश्रावणेवासरक्षितजनयनेप्रेक्षणीयोस्म
10 दीयः पंथावर्षोद्दिनेयत्कथमपिनबहिःस्थियमस्माभिरेव उल्केवयातिपीथिवदनत्कुमु
द्विनीबंधुमालिन्यकर्त्री हंसप्रोद्भासहर्त्रीदृशिनलिनदृशः प्रावृडाविर्बभूव।शापहे
तुकोयथा त्वामालिख्यप्रणयकुपितांधातुरागैःशिलायामात्मानंतेचरणपतितंयाव
दिच्छामिकर्तुं अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यतेमे क्रूरस्तस्मिन्नपिनसहतेसंग
मंनौकृतांतः आलिख्येत्यपीच्छाविषयएव इयंचमेघदूते कुबेरशापतयक्षोक्तिः विर
हहेतुकोयथा अन्यत्रव्रजतीतिकाखलुकथानाप्यस्यतादृक्सुहृद्योमांनेच्छतिनागतश्च शिवः
सहसाकोयंविधेःप्रक्रमः इत्यल्पेतरकल्पनाकवलितस्वांतानिशांतांतरेबालावृत्तवि १०
वर्तनंनव्यतिकरानाप्नोतिनिद्रांनिशि एषाविरहोत्कंठितेत्यभिलाषहेतुकात्भिद्यते

यथा वा मम संध्येयं समुपागत्ते च विरतिं संकेतकाले प्रियो नाद्याऽपी क्षणगोचरीभवति तन्म
न्ये नियुक्तः क्वचित्। कार्यं तर्कविचारमूढगुरुलोकैस्तु त्वं गया कुंगितासुभ्रात्तुं नागरसुंदरीन
सदनेशाक्तोतिनोवाबहिः॥ हास्यो यथा। न्यंगाकांडादि भिश्चेतो विकासो हास उच्यते। रसोऽय
स्तत्प्रकृतिकः सहास्यः कथितो बुधैः॥ न्यंगवैकृतं। उदा। आकुंच्य पाणिमशुचिं मम मू
र्द्धि वेश्या मंत्रांभसां प्रतिपदं पृषतैः पवित्रैः। तारस्वरं प्रहितथूत्कमदात्प्रहारं हाहाहतो
हमिति रोदिति विष्णुशर्मा। अत्र ताड्यमानो विष्णुशर्मा आलंबनं रसाश्रयस्य तत्कर्तृकं
आंदनं उद्दीपनं तद्वाक्यमनुभावः चापलादिर्व्यभिचारीति। यथा वा मम। असंतरंगमि
ति वारवधूवरांगनास्वादयामि रसनौष्ठपुटेन यावत्। यावन्नयाप्रकृतमग्रकरेण तत्
न्या— चैतन्यशून्यमिव मे हृदयं यथा भूत्॥ अत्र वैदिकत्रालंबनं कीदृक् वारांगमि
ति पृष्टे कस्मिंश्चिद्विलासिनि। अति स्वाद्विति च तेनोत्तरिते माधुर्यभ्रांत्या वैदिककर्तृ
कं रसनौष्ठपुटेन वरांगास्वादनं तत्कर्तृकं प्रहरणं चोद्दीपनम्। एतद्वाक्यप्रयोगचेतःशू

न्यतादयोऽनुभावः आवेगगर्वदादयः संचारिणः तैर्वासनारूपतया स्थितस्य श्रोतुर्हा
११ सस्याभिव्यक्तिः। आत्मस्थः परसंस्थश्चेत्यत्र भेदद्वयं मतं आत्मस्थो द्रष्टुरुत्पन्नो विभावे
क्षणमात्रतः। अयं चोदाहृतः। हसंतमपरं दृष्ट्वा विभावश्चोपजायते योसौ हास्यरसस्त
ज्ञैः परस्थः परिकीर्त्तितः स यथा। श्रीतातपादैर्विहितो निबंधे निरूपितानूतनयुक्तिरे
षा। अंगारगं वा पूर्वमहो पयश्चित्रं कथं न वातासमधर्मपत्न्याः अत्र तार्किकपुत्रो रसाश्रयः।
तस्य स्वपितृनिरूपितोऽपूर्वपक्ष आलंबनं। पितुः सौबुध्यं स्मर्यमाणमुद्दीपनं। तत्कर्तृ
कं स्वस्य महत्वप्रकाशनमनुभावः। चापलं व्यभिचारि। एतैस्तार्किकपुत्रे हासो व्यज्यते
। रदनप्रकाशनैतद्वाक्यप्रयोगविशिष्टस्तार्किकपुत्रश्च सामाजिकानामालंबनं।
तदीयानिःशंकोक्तिरुद्दीपिका। रदनप्रकाशनमनुभावः। उद्वेगादीरनयोर्व्यभिचारि ।शिवः
णः। तैः सामाजिकनिष्ठहासस्याभिव्यक्तिः उत्तमानां मध्यमानां नीचानामप्यसौ भवे ११
त्र्यवस्थः कथितस्तस्य षट् भेदाः संति चापरे स्मितं च हसितं प्रोक्तमुत्तमे पुरुषे बु

धैः भवेद्विहसितं चोपहसितं मध्यमे नरे । नीचे पहसितं चातिहसितं परिकीर्त्तितं ईष
त्फुल्लकपोलाभ्यां कटाक्षैरप्यनुल्बणैः । अदृष्टरूपदशनो हासो मधुरः स्मितमुच्यते । वक्त्र
नेत्रकपोलैश्चेदुत्फुल्लैरुपलक्षितः । किंचिल्लक्षितदन्तश्च तदा हसितमिष्यते । सशब्दं म
धुरं कालागतं चंदनरागवत् । आकुंचिताक्षि मंद्रं च विदुर्विहसितं बुधाः । निकुंचितांस
शीर्षश्च जिह्मदृष्टिविलोकनः । उत्फुल्लनासिको हासो नाम्नोपहसितं मतं अस्थानजः
साश्रुदृष्टिराकंपधरमूर्द्धजः शार्ङ्ग·द्वे भागद्वितो हासोपहसिताह्वयः स्थूलकर्णकटु
ध्वानो बाष्पपूरप्लुतेक्षणः । करोपगूढपार्श्वश्च हासोऽतिहसितं मतमिति ९ इष्टनाशा
दिभिश्चेतोवैक्लव्यं शोकशब्दभाक् । रसोऽयं तत्प्रसूतिकः करुणः परिकीर्त्तितः । आदि
ष्टादनिष्टाप्तेः यथा हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषो धिक्प्राणा
न्पतितोऽशनिर्हुतवहस्तेंगेषु दग्धे दृशौ । इत्थं घर्घरमध्यरुद्धकरुणाः पौरांगनानां गि
रश्चित्रस्थानपि रोदयंति शतधा कुर्वंति भित्तीरपि । अत्र चियन्नाकाचिदीश्वरी संबोध्या

आलंबनम् । नदंगदाहृत्वद्दीपनं ॥ आक्रंदनाश्रुपातादयोऽनुभावाः खेदनिर्वेदचिंता
१२ दयो व्यभिचारिणः । तैः शोकाभिव्यक्तिः यथा वा मम । भवने गमने वनेपि वा सहचार
12 स्थिरमावयोः पुरा । कृतमाद्य पराधतोऽधुना सहसा लक्ष्मण मामुपेक्षसे । अत्र लक्ष्मण
आलंबनं । मेघनादनिर्मुक्तशक्तिप्रहारजन्यमूर्छितजन्यमसंभाषणादि च उद्दीपनं ।
रामकर्तृक क्रंदनाश्रुपातादयोऽनुभावाः दैन्यादयो व्यभिचारिणः । तैः शोकाभिव्यक्ति
ः । पूर्वं दृष्टनाशात् अत्रेष्टस्य पर्यंते जीवनात् । अपि प्राप्तिमात्राच्चेति पूर्वस्मात् भेद
ः । प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते । रसो यस्तत्स्वरूपकः स रौद्रः परिकी
र्त्तितः । यथा । कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भि
रुदायुधैः । नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना मयमहमसृङ्मेदोमांसैः ।शिवः
करोमि दिशां बलिं । इयं च वेणीसंवरणे द्रोणवधानंतरमश्वत्थाम्नः पीडवाक्प्रत्यु १२
क्तिः ॥ अत्रार्जुनादय आलंबनं । गुरुवध उद्दीपकः परुषोक्तिः दंतपातनबाणसंधा

नादिकमनुभावः। गर्वामर्षोग्रतादयः संचारिणः। यथा वा मम। अर्वाग्वीर्यबलकान्त
वीर्यगलत्कुक्षिवक्षः स्थपादनर्गलविनिर्गलदुहलरक्तार क्तत्विषा। भवद्रुधिरतर्प
णस्फुरदनल्पधाराजलज्वलत्परशुनाममप्रतिभुवा हठान्नूयते। अत्र तदानीं रामत्वे
न ज्ञातो गुरुकार्मुकभंजक आलंबनं। अतएव विरोध्यनुपादानं। गुरुद्रुहो नामग्रहणा
नौचित्यात्क्रोधाधिक्याद्वा। ध्वनिविशेषानुमितो निःशंकधनुर्भंग आक्षेप उद्दीप
कः। परुषोक्तिपरशुप्रदर्शनादयोऽनुभावाः गर्वादयो व्यभिचारिणः। तैः क्रोधाभि
व्यक्तिः। पूर्वं गुरुनाशजन्यः क्रोधोऽत्र तु गुर्वपराधजन्यः एवं रसाननुगुणो बोधोऽ
त्र तु तदनुगुण इति पूर्वस्माद्भेदः। कार्यारंभेषु संरंभः स्थेयानुत्साह उच्यते। रसोयस्त
त्प्रकृतिकः सोयं वीरस्त्रिधा मतः। युद्धवीरो दानवीरो दयावीरस्तथापरः तत्राद्यो
यथा॥ क्षुद्राः संत्रासमेते विजहित हरयः क्षुण्णशक्रेभकुंभा युष्मद्देहेषु लज्जां
दधति परममी सायका निष्पतंतः। सौमित्रे तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघ

नादः। किंचित् भ्रूभंगलीलानियमितजलधिं राममन्वेषयामि। अत्र राममालं
१३ बनं। रणदर्शनं उद्दीपनं। अनुनायकलक्ष्मणाद्यवहेलनमनुभावः। गर्वामर्षादयः
13 संचारिणः। तैरुत्साहोभिव्यज्यते। यथा वाममम। दिङ्मुखे जयतुरंगरेणुभिः पत्रिभिः
सिततरैः शरासने। विद्धिवां शिरसितस्य चाद्य यास्त्वौपते युगपदेव संगरे। दानवीरो
यथा। प्रेमतस्यन गुणेषु नाभवन्नस्म वेदन गुणांतरं च सः दित्सया तदपि पार्थिवोर्थि
नं गुणपगुणपद्धतिनव्यजीगणत्। अत्र पात्रलाभो विभावः। पंडितापंडितसाधारणे
नदानमनुभावः। हर्षादयः संचारिणः। तैर्दानविषयोत्साहाभिव्यक्तिः। दयावीरो यथा।
तपेति गामुत्प्लवते दिलीप इत्यत्र दयाविषयोत्साहः स्थायी। रौद्ररागानुजनितं चि
त्तविक्लवदं भयं रसो यस्तस्य प्रकृतिकः सोयं वाच्यो भयानकः। स यथा। ग्रीवाभंगाभिरा शिवः
मं मुहुरनुपतति स्यंदने बद्धदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं। द १३
र्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं

स्तोकः मूर्च्छां प्रयाति । अत्र राजा आलंबनं । शरपातउद्दीपनं । पश्चाद्दर्शनादयोऽनुभावाः ।
आसादयः संचारिणः । औत्पातिकप्रभवस्त्रासः । स्वापराधोत्थं भयं इति मतेत्तु यथा मम
। वीक्ष्य घोरघनघर्घरस्वरां भीषणामघविभिषणानुजां । आलिलिंग परिशुष्यदाननेका
ननिरघुपतिं विदेहजा ॥ अत्र सूर्पनखा आलंबनं विकृताकृतिदर्शनं उद्दीपनं । आलिंगना
ननशोषादयोनुभावाः । त्रासावेगदैन्यादयः संचारिणः । जुगुप्सा गर्हणार्थानां दोषमाहात्म्य
दर्शनात् । रसोयस्तत्प्रकृतिकः स बीभत्सो बुधैः स्मृतः । स यथा । उत्कृत्योत्कृत्य कृत्तिं प्र
थममथ पृथुत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिंडाद्यवयवसुलभान्युग्रपूतीनि ज
ग्ध्वा । आर्त्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगत
मपि क्रव्यमव्यग्रमत्ति । अत्र शव आलंबनं । तदुत्कर्त्तनादिकं उद्दीपनं । आक्षिप्तनेत्र
निमीलनादयोऽनुभावाः । आवेगादयः संचारिणः । यथा वा मम । मज्जामस्तिष्कपंककर्द
वनविघटितप्रोढघर्मांशुधर्मारक्तेनारक्तदेहाः ज्वलनलकगलत्सूयमाढांगरागाः । क्रं

तैर्नागेंद्रकरोर्मर्दस्तुतवनिता वीज्यमानाः नूमश्यानेत्रव्यादाः कौतुकेनप्रति श्रुचिदिवसं
१४ भोगीतांभावयंति। अत्ररूपादि आलंबनं। तल्लेपनादिकं उद्दीपनं। अन्यत्पूर्ववत्। विस्म
14 यश्चित्तविस्तारोवस्तुमाहात्म्यदर्शनात्। रसोयस्तत्प्रकृतिकः सोद्भुतः परिकीर्तितः। स
यथा। चित्रंमहानेषबतावतारः क्वकांतिरेषाभिनवेवभंगिः। लोकोत्तरं धैर्यमहोस्व
भावः काप्याकृतिर्नूतनएषसर्गः अत्रवामन आलंबनं॥ विलक्षणकांत्यादिदर्शनं उ
द्दीपनं। एतद्वाक्यप्रयोग आक्षिप्तं चविस्फारितनयनावलोकनादिकमनुभावः। आवे
गादयः संचारिणः तैर्विस्मयाभिव्यक्तिः। तत्वज्ञानादिनाचेतोवृत्तिर्वैराग्यपरावृभाक्। नि
र्वेदस्तत्प्रकृतिकोरसः शांतरतीरितः। सयथा। अहोवाहारे वाकुसुमशयनेवादृषदि
वामणौवालोष्ठेवाबलवतिरिपौवासुहृदिवा। तृणेवास्त्रैणेवाममसमदृशोयांतुदिव शिवः
साः क्वचित्पुण्येरण्येशिवशिवशिवेतिप्रलपतः। अत्रप्रपंचः सर्वोप्यालंबनं॥ अ १४
नित्यत्वादिज्ञानमाक्षिप्तंउद्दीपनं। सर्वत्रसमदर्शिताऽनुभावः। मत्यादयः संचारिणः।

यथा वा मम ॥ नादेयं कनकं न देयमथवा स्वच्छप्नोऽपि हालाहलं नस्मेहस्तरुणीजनेन कृति
लच्चाल्लेपि कोपादयः । न स्तोत्रेण सुखं द्विषापि कृतया दुःखं नवा निंदया श्रीविश्वेश्वराद्याव
न्त्रादयस्तथा सैषा दशा मेधुना । अत्र वदंति । शांतो नाम रसस्तावदनुभवसिद्धतया दुरपह्न
वः न चैतस्य स्थायी निर्वेदो युज्यते । तस्य विषयेष्वलंप्रत्ययरूपत्वादात्मावमानरूपत्वात् ।
शांते च निखिलविषयपरिहारजनितात्ममात्रविश्रामानंदप्रादुर्भावमयत्वानुभावात्
। तदुक्तं । यच्च काम्यसुखं लोके यच्च दिव्यं महत्सुखम् । तृष्णाक्षयसुखस्यैते कलां नार्हति
षोडशीं इति ॥ अत एव सर्ववृत्तिविरामोऽस्य स्थायीति निरस्तं । अभावस्य स्थायित्वायोगात्
। तस्माच्छमोऽस्य स्थायी । निर्वेदादयस्तु व्यभिचारिणः स च । शमो निरीहावस्थायामानंदः
स्वात्मनिस्थितः । रसो यस्तस्य प्रकृतिकः स शांत इति भण्यते इति सिद्धं । अथ कथमेत एव र
साः । भगवदालंबनस्य रोमांचाश्रुपातादिभिरनुभावितस्य हर्षादिभिः परिपोषितस्य
भारतादिपुराणश्रवणसमये भगवद्भक्तैरनुभूयमानस्य भक्तिरसस्य दुरपह्नवत्वात् ।

भवेगेदनुरागरूपाभक्तिश्चात्रस्थायिभावः। सयथा। नोद्दामासियदितत्वधियंमेयद्धमोह
१५ मथितंरघुवंश। येनरावणचमूर्युधिमूढात्वन्मयंजगदपश्यदशेषं। नचासौशांतरसें
15 तर्भावमर्हति। अनुरागस्यवैराग्यविरुद्धत्वात्। उच्यते। भक्तेरतित्वेनभावांतर्गततया
रसत्वानुपपत्तेः। रतिर्देवादिविषयाव्यभिचारीतथांजितः॥ भावंप्रोक्तस्तदाभासास्त्वनौचि
त्यप्रवर्तिता इतिप्राचांसिद्धांतात्। नचतर्हिकामिनीविषयायाअपिरतेर्भावत्वमस्तुरति
त्वाविशेषात्। अस्तुवाभवेगेऽप्यत्रस्थायित्वं। कामिन्यादिरतीनांचभावत्वंविनिगम
काभावादितिवाच्यं। भरतादिमुनिवचनानामेवात्ररसभावत्वादिव्यवस्थापकत्वेनस्वा
तंत्र्यायोगात्। अन्यथापुत्रादिविषयायाअपिरतेःस्थायिभावत्वंकुतोनस्यात्। नस्या
द्वाकुतःशुद्धभावत्वंहासशोकादीनामपिसखित्वदर्शनमाकुलीस्यात्। रसानांनवत्वग शिवः
णनाचमुनिवचननियंत्रिताभज्यतेतियथाशास्त्रमेवन्यायः। केचित्तु। रसेसारश्चम १५
त्कारःसर्वत्राप्यनुभूयते। तच्चमत्कारसारत्वेसर्वत्राप्यद्भुतोरसः। अतस्तद्भुतमेवा

ह जयदेवकृतौ रसं। इति जयदेवेनाद्भुत एव रस इत्यभिहितं तन्न वैलक्षण्यस्यानुभवसि
द्धत्वात् प्रकृतिभेदाच्च। नापि व्यभिचारिषु रसेष्वपि नइव रत्यादिषु विस्मयस्यानुगमः शोकादि
षु तथाननुभवात्। लौकिकरसे नियमतस्तदभावादिरनुपपत्तिपातात्। काव्यादौ च तथा
प्युपनिबंधात्। अथ प्रतीयते तावत्सर्वत्र चमत्कारः। स चाद्भुत एव तस्यैव रत्यादिविभा
वानुरोधेन व्यपदेशांतरमिति तन्न। तर्हि विस्मयानुरोधेनाद्भुत इत्यस्यापि सुवचत्वात्
। अन्यथा तद्विरहिणामपि तदास्वादप्रसंगात्। अथ पृथगेवायमद्भुतः सर्वैरेव रसभ
दाभिमतैर्जन्यत इति चेन्न संजन्यतां सत्तु न रसः तद्धेतुनियतरत्याद्यभावात्। अलौकि
कचमत्कारकारी रस इत्यभियुक्तपारिभाषिकव्यवहारात्तस्य तथा परिभाषणे तु नास्मा
कमपचयो न युष्माकमुपचय इति भूतमनल्पजल्पनेन॥ इति श्रीमद्दिति भूदेवविरचिते
द्वितीयः स्तबकः समाप्तः॥ अथ रसवद्भावस्यापि काव्यजीवितत्वरूपतया सम्मतत्वेनोपेक्षा
नर्हतया प्रसंगात् निर्वेदादि त्रयस्त्रिंशद्व्यभिचारिभावरूपभावविशेषाणां रसत्व

रूपोपपादकत्वयोपोद्घाते न च भावास्ते निरूप्यन्ते। भावानाहुः काव्यप्रकाशकृतः। रतिर्दे
१६ वादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तास्तदाभासा ह्यनौचित्यप्रवर्तिता इति।
16 अञ्जितो व्यञ्जितः। साक्षाच्छब्देनाभिधाने दोषस्य वक्ष्यमाणत्वात्‌ आदिशब्दात्‌ गुरुद्विजनृ
पपुत्रादिविषया ग्राह्या। व्यभिचारिणश्च। निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः
आलस्यं चैव दैन्यं च चिन्तामोहः स्मृतिर्धृतिः। व्रीडा चपलता हर्ष आवेगो जडता तथा। गर्वो
विषाद औत्सुक्यं निद्रापस्मार एव च। सुप्तं विबोधोमर्षश्चाप्यवहित्थमथोग्रता। मतिर्व्याधिस्त
थोन्मादस्तथा मरणमेव च त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः। त्रयस्त्रिंशदमी भावाः
समाख्यातास्तु नामत इति तत्र देवविषया रतिर्यथा। शरणं भवत मिति किराते। गु शिवः
रुविषया यथा। तस्याज्ञयैव परिपालयतः प्रजां मे कल्पोपकण्ठपलितं करणी रजस्येयं। यज्ञ १६
भेरूपमिव मामनुशास्ति पूर्वमद्यापि तन्मपि गुरुर्गुरूपस्स्यातः। द्विजविषया यथा। हरस
द्यं संप्रतीतिमाद्ये। राजविषया यथा। राजन्राजसुतानपाठयति मां देव्योपि न ह्री स्थिताः

न्कुर्व्वे भोजयमां कुमारसचिवैर्नाद्यापि किं भुज्यते। इत्थं राजशुकस्तवारिभवने मुक्तो
द्धगैः पंजराच्चित्रस्थानवलोक्य पक्ष्मन्यवलभावैकैकमाभाषते। पुत्रविषया रतिर्यथा॥ धू
लिधूसरकपोलमेति के मातरं सभवलो कपकातरं भ्रातरं सपदि रेवतीपतेर्न रमोप
वनिनासमधावति। तत्वज्ञानोपयाद्यैष्यान्निर्वेदः स्वावमाननं॥ तत्र चिंता श्रुनिः
श्वासवैवर्ण्यदीनसा॥ चित्तस्य खेदो निर्वेदस्तत्वज्ञानोदयादिभिः। इत्यपि के
चित्। तत्र नीचपुरुषेष्वाक्रोशनाधिमाधि तिरस्कारताडनदारिद्र्यविरहपरसंपद्दर्शना
दिभिः। उत्तमेषु तत्ववमननादिभिर्जनिता विषयविद्वेषारम्भा वृत्तिश्चित्तस्यति विवे
कः। नित्यानित्यवस्तुविवेकजन्यासा स्थाप्यभावः। उदाजीवितेन कृतमप्सरसां ततस्त
णामुक्ति रिह युक्तिमतीनः। इत्यनक्षरमवाचि घृताच्यादीनतिः श्वसित निर्गमित्त
नत्रत्रेंद्र कर्दक स्वर्गत्यागजन्ये प्याविभावः। निश्वासादयो नुभावाः। पथावाम
दीयपद्ये। नितरां वनिता कृतिप्रियातनयः केवलमात्मपोषकः। परकामुकलोलु

पाखुषानदलं जीवननिःफलं तु मे । इयं च गृहकलहक्लेशितस्य कस्यचिदुक्तिः । अत्रे
१७ र्ष्यादीत्याद्यशास्त्रग्राह्यो गृहकलह आलंबनं । दीनतादयोनुभावाः । रत्यायासकला
भ्यासात्स्यान्निर्निःप्राणनेवयालस्यां वैवर्ण्यकंपानुत्साहकार्श्यादयो मताः । बलस्या
पचयोस्त्रा निराधिव्याधिप्रकर्षभूरिसेवे । तन्वा चित्रवृत्त्यो त्मकनाशरूयापालानेरस
माचेशान्त्र । उदा० । क्षामक्षामकपोलमाननमुरः काठिन्यसुन्नस्तनं मध्यः क्लांत
तरः प्रवानमविनतावंसौ छविः पांडुरा । शोच्या च प्रियदर्शना च मदनाक्लिष्टेयमा
लक्ष्यते पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी । अत्र विरहो भावः कार्श्यादि
योऽनुभावाः । अनर्थप्रतिभासंज्ञा कापरा त्रौ यो स्वचुर्नपात्र । वैवर्ण्यकंपवैमुख्यापा
र्श्वलोकास्यशोषकृत् । उदा० । दीर्घप्रजाभिरतिकौतुकिनीभिराभिरस्मिन्नलकीर्णपार शिवः
हेमम ताडमाने । ज्योतिर्मये नवपुषा जगदंतरात्मा निजिष्यते कुलगुरुर्भगवान्वसि १७
ष्टः । अथ ताडकारूपस्त्रीवधो विभावाः । मुखवैवर्ण्योदयः अक्षिप्तात्र अनुभावाः परो

त्कर्षोऽस्मां स्तयागर्वदौर्जन्यमन्युजा। दोषोद्घोषभ्रूविभेदावज्ञाक्रोधेंगितादयः। द्र
मामेवासहनादिन्नाद्वेष्यव्यवहरंति। उदा: आसिमात्मसुभगत्वसगर्वा कापिश्र एवतिमद्यो
निबभाषे। वीक्ष्यणेपि सघृणा सिन्नणी। किं यासि नलमपिसार्द्धमनेन। अन्यसौंदर्यगर्वो
विभावः दमयंती निंदानुभावः। यथा मम। वदनु सदसि घुष्टं बुद्धिमानस्ति नैषः प
ठतु सकलशास्त्राण्यंजसा यस्थितिः क्व। रुददिह पुरा सौवाल्ये स्ताड्यमानः प्रति
दिनमभिमानः किं निदानोयमस्य। स्वल्पवयस्कं पंडितं उद्दिश्य पितृव्यपुत्रस्य मूर्ख
स्योक्तिः। अत्र मैर्जन्यं विभावः निंदावहेलनादिकमनुभावः। नचात्र गर्वो विभावः
। तस्य मूर्खत्वेन विद्यादिप्रयुक्तगर्वाभावात्। अथवा। विद्धि चात्र रसमोजसा हरे
रैश्वरं धनुरभाजि यत्त्वया। वीतमूलमनिलोनदीरयैः यातयत्यपि मृदुस्तटद्रुमं
। अत्रमत्सुर्विभावः। मद्यपानेन मनसः समुल्लासो मदः स्मृतः। संमोहानंदसंभेदः
सवलदंगवचोगतिः मधुपानादिजो ज्ञेयो मदो विविधभावस्तत्र उत्तमसत्वः प्रहस

तिगायतितदुच्चमध्यमप्रकृतिः। परुषवचनाभिधायीरोतिरोदित्यधमसत्वः। अयं
१८ चमदः त्रिविधः। तरुणमध्यमाधमभेदात्। तत्र अव्यक्तासंगतैर्वाक्यैः सुकुमारस्खल
द्भ्यदैः। अभिनेयो मदः सोयंतरुणः कथितो बुधैः॥ भुजाक्षेपस्खलद्गत्याघूर्णने मध्यम
:स्मृतः। गतिभंगस्मृतिध्वंसहिक्काछर्द्यादिभिः परः। उदा०। कोपवृत्यनुनयान्गृहीत्वा
प्राग्यथामधुरसाहितमोहा। कोपितं विरहखेदितचेताः कांतमेव कलयंत्यनुनिन्ये। अत्र
मद्यसेवनं विभावः। स्मृतिध्वंसादयोऽनुभावाः। श्रमः खेदोध्वरत्यादेः श्वासनिद्रभरा
दिकृत्। श्रमस्तान्योर्विभेदं तु चक्रे कारणकार्यतः। श्रमस्यातिशयाचस्लामथवप्ला
निमूर्च्छिरे। यदाहुः। अध्वव्यायामसेवाद्यैर्विभावैरनुभावकैः॥ गात्रसंवाहनैरास्यसंको
चैरंगमोटनैः निःश्वासैर्जृंभितैर्मंदैः पादाक्षेपैः श्रमो मतः। अयं सत्यपि बले शारी ।शिवः
रव्यापारे दैवजायते नतु सानिरतोऽस्मानिः श्रमस्य भेदः। बहुत्वरशारीरव्यापारज १८
न्मानिश्वासांगसंमर्दनिद्रादिकारणीभूतः खेदविशेषः श्रम इति सिद्धं। उदा० अलस

चलितमुग्धान्यध्वंसंजातखेदाद्दृशिथिलपरिरंभैर्दत्तसंवाहनानि। परिमर्दितमृणालीदु
र्बलान्यंगकानित्वमुरसिममकृत्वा यत्रनिद्रामवाप्ता॥ अत्राध्वसंचारोविभावः गात्रसंवाहना
द्योऽनुभावाः आलस्यश्रमगर्भादिजैस्त्वंजृंभाश्रेयादिकृत्। अभिरुचिर्गर्भव्याधिश्रमा
दिजन्माचेतसःक्रियाऽनुन्मुखतालस्यमितिनिष्कर्षः। अत्रचनासामर्थ्येनापिकार्याकार्य
विवेकशून्यत्वंतेनकार्याऽकरणरूपस्यानुभावस्यतुल्यत्वेपिग्लानेर्जडतायाश्चभेदः। उदा:
मम। वटकपर्पटमोदकमोदितंबकुलन्नाकमनोदनभोजनं। अथयतिकुतमास्तरणंकुरुस्व
पिहितावदिहेवबरानने। अत्रबहुभोजनंविभावः। स्वापकालक्षेपासमतादयोऽनुभावाः।
जडतायांमोहात्पूर्ववृत्तित्वमुत्तरवृत्तित्वंत्वत्रत्यपरोविशेषः दौर्गत्यादेरनोजःस्याद्दै
न्यंकार्ष्ण्यमृजादिकृत्। चिंतोत्सुक्यात्मनस्तापाद्दौर्गत्याच्चविभावतः। अनुभावाश्चशिरसोप्या
वृत्तेर्गात्रगौरवात् देहोपस्करणत्यागादेभ्यंभावंविभावयेत्। दुःखदारिद्र्यापराधादिज
नितस्वापकर्षभावणोदिहेत्वभिज्ञत्ववृत्तिविशेषोदैन्यमितिनिष्कर्षः। उदा०। यस्यासुहृ

तत्कृतत्तिरस्कृतिरेत्यनन्तसूचीव्यधव्यतिकरेण पुनः किं कर्णौ कां चीगुणग्रथनभाजनमेष सोऽस्मि
१९ जीवन्न संप्रति भवामि किमावहामि। अत्र दौर्गत्यमनस्तापादयो विभावाः। ध्यानं चिंता हितानाप्तेः
15 शून्यताश्वासतापकृत्। प्रयत्नपूर्विका न्वेष्यस्मृतिश्चिंतेति केचन विभावा यत्र दारिद्र्यमैश्वर्य
भ्रंशनं तथा। इष्टाप्राप्तिर्हितिश्चास्याः श्वासोच्छ्वासावधोमुखं। संतापः स्मरणं चैव कार्श्यं देहानुप
स्कृतिः॥ अधृतिश्चानुभावाः स्युः सा चिंता परिकीर्तितेत्याहुः। वितर्कोऽस्याः स्थले पूर्वे पाश्वासे
चोपजायते। दृष्टाप्राप्तनिद्रादयादिजनिता ध्यानापरपर्याया वैवर्ण्य भूलेखनाधोमुखत्वादि
हेतुश्चित्तवृत्तिविशेषश्चिंतेति निष्कर्षः। उदा॰ अनाघ्रातं पुष्पं किसलयमलूनं कररुहैरनावि
द्धं रत्नं मधु नवमनास्वादितरसं। अखंडं पुण्यानां फलमिव च तद्रूपमनघं न जाने भोक्तारं कमि
ह समुपस्थास्यति विधिः। अत्र तदप्राप्तिर्विभावः। स्मरणादिकमनुभावः। मोहो विचित्तता शिवः
भीति दुःखवेगानुचिंतनैः घूर्णनाज्ञानपतनभ्रमणादर्शनादिकृत्। एवं च भयवियोगादि १२
प्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः। अंतरांतराशून्यतारव्या चित्तवृत्तिसंवलिता

सेति भुनक्त्याः उदा॰ पश्याममम। वारं वारं कमलनयनः प्रेक्ष्यते यत्पुरस्तात् पाणिस्पर्शे कथम
पि नस्ते जायते नास्ति कल्पः। उक्तः किंचिन्न वदति पुनस्तेन मुग्धीकृताहं नालं द्रष्टुं हृदयम
धुना कार्यसांसारिकेषु। अत्र वियोगो विभावः मनोविकारस्मादिकमनुभावः सदृशज्ञानचिंता
द्यैः संस्काराज्जायते स्मृतिः भ्रूसमुल्लासकरजवादनादिस्तदनुभवः। एवं च संस्कारजन्यं ज्ञानं
स्मृतिः उदा॰ एतन्नदेव कदलीवनमध्यवर्तिकांतासरं स्पृहयनीयशिलं मे। अत्र स्थिता
त्वणमदाढ्यकृशोपदेश्मः सीतातलो हरिणकैर्न विमुच्यते स्म। अत्र शिलातलदर्शनं एकसं
बंधिज्ञानविषयापरसंबंधिस्मारकं विभावः। भ्रूविकासादय आक्षिप्ता अनुभावाः। अ
भीष्टार्थस्य संप्राप्तेरस्पृहायमानता धृतिः। सौहित्यवदनोल्लाससहासप्रतिभादिकृत्। एवं
च लोभशोकभयादिजनितोपद्रवनिवारणकारणीभूतश्चित्तवृत्तिविशेषो धृतिः। उदा॰ म
मः अयि नंदकुमार मम भुक्तये भवनद्वारि निचारयांचकार जननी मम तेन नाविद्ययेमनसः के
न सवानि वारणीयः अत्र द्वापि समागतस्य कृष्णस्यातिरस्कारेपि निरुपद्रवचेतोरछानेः वस्त्रा

पनात्मकेष्टसिद्धिर्विभावः वदनोल्लासादय आक्षिप्ता अनुभावाः दुराचारादिभिर्व्रीडाधार्ष्ट्या
२० भावोऽभिधीयते इति केचित्तन्न । अभावस्य चित्तवृत्तावसमावेशात् । चेतोनिमीलनं व्री
डाः स्वगरागस्तवादिभिः । वस्त्राङ्गुलीयकस्पर्शो भूरेखाधोमुखादिकृत् । तथा च स्त्रीणां सुरतवि
न्नभावद्युपुरुषमुखावलोकनादेः पुंसां च मतिस्फातसंगपराभवस्तवादेरुत्पन्नो वैवर्ण्याधो
मुखत्वादिकारणीभूतः चित्तवृत्तिविशेषो व्रीडा । उदा॰ यथा मे॰ स्वेदः कपोले श्लथता दृक्त
से विस्मितादि साधिगिरं निपीय । दृशानमत्कंधरबंधुरं तीव्र स्त्री कुरंगीनयने यमास्ते ॥
अत्र विपरीतसुरतप्रकाशो विभावः । मुखानमनाद्यनुभावः । मात्सर्यद्वेषरागादेश्चाप
लं त्वनवस्थितिः । तत्र भ्रंशनयाऽऽरूप्यस्वच्छंदाचरणादयः । आत्मप्रकाशनपरा चेष्टा च
पलत्तोच्यते इति केचित् । अमर्षप्रतिकूलेर्ष्यारागद्वेषाश्च मत्सराः । इति यत्र विभावास्तु शिवः
रनुभावस्तु भर्त्सनं । वाक्पारुष्यंप्रहारश्च ताडनं वधबंधने । तत्र चापलमनालोच्य कार्यका २०
रित्वमिष्यते इति । एवं च अमर्षादिजन्मा वाक्पारुष्यादिकारणीभूता चित्तवृत्तिश्चापल

ता। उदा॰ अहितुव्रतपापात्मन्नेवमेदर्शयाननं। आत्मानं हन्तुमिच्छामि येन त्वमसि भावितः।
एषा भगवदनुरक्तिविघ्नोपायमपश्यतः प्रह्लादं प्रति हिरण्यकशिपोरुक्तिः। भगवद्द्वे
ष्टापितः पुत्रद्वेषोऽत्र विभावः। आत्मवधेच्छा परुषवचनं चानुभावः। न चामर्ष एवात्र प्रस्तु
त इति वाच्यं। सदैव भगवदनुरागिणि प्रह्लादे हिरण्यकशिपोरमर्षस्य चिरकालसंभृतत्वे
नात्मवधेच्छाया इदं प्रथमतानुपपत्तेः। इदं प्रथमकार्यस्य चेदं प्रथमकारणं प्रयोज्य
तया प्राचीनवृत्तिविलक्षणाया एव वृत्तेः स्वपरतारूपायाः सिद्धेः न चामर्षप्रकर्ष एवात्म
वधेच्छादिकारणमभिमन्यतामिति वाच्यं प्रकर्षस्यापि स्वाभाविकाविलक्षणतया अव
श्यकत्वात् तस्य च स्वपरतापदार्थत्वात्। मनःप्रसादो लाभादेर्हर्षोऽश्रुस्वेदगद्गदाः। दे
वभर्तृगुरुस्वामिप्रसादः प्रियसंगमः। मनोरथाप्तिरप्राप्यमनोहरधनागमः। तथोत्पत्ति
श्च पुत्रादेर्विभावो यत्र जायते। नेत्रवक्त्रप्रसादाश्च प्रियोक्तिः पुलकोद्गमः। अ
श्रुस्वेदादयश्चानुभावा हर्षे तमादिशेत्। तथा इष्टप्राप्त्यादिजन्मा सुखविशेषो बाह

र्षः। उदा॰ जनाय शुद्धान्तचराय रघुः अत्र पुत्रजन्मश्रवणं विभावः। सर्वस्वदानमनुभावः। आ
२१ वेगो राजविद्रावाद्युत्पातादेः संभ्रमो मतः। तत्र विस्मरणं स्तंभः स्वेदः कंपः स्खलद्गतिः। एवं
चानर्थातिशयजनितश्चित्तस्य संभ्रम आवेगः। उदा॰ तन्नादस्त्रं कथमुदेति मनु
४ ष्यलोके तेजोद्भुतं निरभिसंधि न तावदेतत्। नान्यैर्वचोऽस्य चरिता निरदशाननस्य धिक् चिंत
या रजनिरक्षिषु नः प्रयाता। अत्र रामपराक्रमश्रवणं विभावः। स्थैर्याभावोऽनुभावः। न चा
त्र चिंतापि व्यज्यते इति वाच्यं। तस्याः शाब्दोपात्तत्वेन व्यज्यमानाया अपि चमत्काराज
नकत्वात्। रावणदुर्ललितरामचरितयोर्युगपद्दर्शनेन साध्वसेनोद्वेगस्यैव प्रत्ययात्।
क्रियास्वपाटवं जाड्यं चिंतोत्कंठाभयादिभिरित्येके। अन्ये तु। अप्रतिपत्तिर्जडता स्यादिष्टा
निष्टदर्शनश्रुतिभिः। अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्रेति। कार्याविवेको शिवः
जडता परतः शृण्वतोऽपि वा। तद्विभावा इष्टानिष्टदर्शनश्रवणादयः। अनुभावास्त्वमी २१
तूष्णींभावविस्मरणादयः सा पूर्वपरत्वेनास्यान्मोहादिति विदांमतं। तथा च उत्कंठाभयवि

रहेष्टानिष्टदर्शनश्रवणादिजन्यावश्यकर्त्तव्यार्थप्रतिसंधानविकलाचित्तवृत्तिर्जडता
। उदा॰ यथा वा मम ॥ ग ॥ दंधकारगिरिगह्वरमाश्रितानां त्वद्वक्रसंस्मरणशुष्कमुखां
बुजानां । देवोल्लिखिता हिमणिकांतिकृतः प्रकाशाः श्यामां प्रति क्षितिभुजामकरोद्दवस्थां ॥ अ
त्र खड्गस्मरणं विभावः अनिमिषनिरीक्षणादयश्चाक्षिप्ता अनुभावाः । गर्वोभिजनलाव
ण्यधनैश्वर्यादिभिर्मदः । सविलासांगवीक्षाविनयावज्ञादिकृत्तु सः । तथा रूपधनविद्या
बलादिप्रयुक्तस्वोत्कर्षज्ञानाधीनं परावहेलनं गर्वः । उदाहरणं मम ॥ नकदापि भजामि भू
षणं निमंथिता वा मम चातुरी न काचि । तरलः सततापि लंमदंगे वनमाली मुकुरादिव
कृदृष्टिः । अत्र सौंदर्यप्रयुक्तस्वोत्कर्षभावनं विभावः अंगविक्षादयोऽनुभावाः । मम । पी
ठिस्थैकविता कलाकुलालता शौर्यं तथान्ये गुणाः संतु प्राणभृतां तथापि भवनद्वारस्य
देशे मम । वेदत्वद्वा— निगजेंद्राः निगहने रत्नप्रभाभासुरेऽतः पूरोदर पूरणाय विवशा
स्तिष्ठंत्यमी सर्वदा ॥ अत्र धनं विभावः । पंडिताद्यवहेलनं अनुभावः । यथा वा मम । सा

हि [illegible] स्य पाथोनिधिमाथ्यमंथस्वतर्कविद्यागहनैकसिंहः। कश्चित्तपीयूषकणांबु
वाहः सोहं कथंमूर्खगणैर्विदिष्ये। अत्रविद्याविभावः। मूर्खावज्ञासंभाषणमनुभावः। यथा
वा — — । द्विरदानिचदिग्विभावितांश्चतुरस्तोयनिधीनिरायनः। असहेतरणेतवानुजा
नूद्विषतांकः त्रातमन्युतेजसः। अत्रबलंविभावः। परावज्ञादिकमनुभावः। प्रारब्धकार्या
सिद्ध्यादेर्विषादः सत्वसंक्षयः निश्वासोच्छ्वासहृत्तापसहायान्वेषणादयः। इष्टासिद्धिरा
जगुर्वाद्यपराधादिजन्योनुतापोविषादः। उदाः। भस्मांकुरेतिखुरलीकलहेकुमारमप्या
क्षिप्यमरुषश्रोषमदांधचेताः। दृष्टोस्मियः स्मितमिथोहसितंनृपाभ्यांनत्वापभंगमपि
हामरणः श्रृलोमि। अत्ररामवधासिद्धिर्विभावः। निःश्वासादयोऽनुभावाः। कांतनाक्षम
त्वमौत्सुक्यंरम्येच्छारतिसंभ्रमैः। तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमाः यदाकुः।
संजातमिष्टविरहादुद्दीप्तप्रियसंस्मृतेः। निद्र्यातंद्रयागात्रगौरवेणचचिंतया। अनु
भावितमाख्यातमौत्सुक्यंभावकोविदैरिति। तथाचाधुनैवास्यममलाभोस्त्वितीछयात्रो

सुप्तं उदा॰। निनयद्बाष्पसंरोधं सुभ्रूश्चांचल्यतारकं। कदम्बनयनश्रीलाजंबमालोकयंमृगी
दृग्नाः। कांताविरहोऽत्र विभावः। चिंतादयोऽनुभावाः। निद्रा व्यापारवैमुख्यमिंद्रियाणां श्रमा
दिभिः तत्र जृंभांगभंगाक्षिमीलनोच्छ्वासनादयः। श्रमादिप्रयोज्यं चित्तस्य निमीलनं निद्रा
उदा॰ सामदागमनं त्वं हि तल्लोबाजागरेणगमिताखिलदोषा। बोधितापि तु बुबुधे मधुपै
र्नप्रातराननजसौरभलुब्धैः। रात्रिजागरणश्रमोऽत्र विभावः। मधुपैर्बोधनेऽपि बोध
भावोऽनुभावः। आधेः आंत्यंतदुःखादिरपस्मारस्तथाविधः। मनःक्षेपस्त्वपस्मारो ग्रहा
वेशादिसंभवः इति। केचित् वियोगशोकभयजुगुप्सादीनामतिशय्यात् ग्रहावेशादेश्च
सन्नो व्याधिविशेषरूपश्चित्तवृत्तिविशेषोऽपस्मारः। व्याधित्वाविशेषस्य वाच्यत्वेऽपि
विशेषाकारेण पुनः कथनं बीभत्सभयानकः योरस्यैव व्याधेरंगत्वं नान्यस्येति स्फोर
णाय। विप्रलंभे तु व्याध्यंतरस्यापस्यापि च। उदा॰। हरिमागतमाऽकर्ण्य मथुरामंतकां
तकं। कंपमानः श्वसन्कंसो निपपात महीतले। अत्र भयं विभावः। कंपनिःश्वासपत

नादयोऽनुभावाः। विरोधिभावात्पूर्वस्य प्रस्मृतिर्विस्मृतिर्भवेत्। ध्यानजाड्यप्रमोहाधिय
२३ रितापादिकृन्नुसा। इत्यन्ये। स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः। कोपावेगभयग्ला
२३ निसुखदुःखादिकारकः। तथा चानुभवविशेषः स्वप्नः। उदा॰ मम॥ विमुखेपि पिधात
रि प्रभाते मम निद्रासखि संमुखी तथा सालसं यथागतधासरोजनाभः समुपात्तं
भिमयादयाविहीनः। अत्र निद्रा विभावः। मिथ्योपालंभादयोऽनुभावाः। निद्रापग
महेतुभ्यः प्रबोधश्चेतनागमः। जृंभांगभंगनयनमीलनांगावलोककृत्। उदा॰ मम।
कुटिलकपटसिंधो मुंच पालिं मदीयेन च कथिनतवास्यं सर्वथालोकयिष्ये। इति नवद
तिनिद्रादरिद्रीता प्रेयसी मां किमपि परिहसियावत्तावदासीत्प्रभातं। अत्र प्रभातं विभाव
ः। जृंभादयोऽनुभावाः। अधिक्षेपापमानादेरमर्षोऽभिनिविष्टता। तत्र स्वेदः शिरःकंपः शिवः
सविलासांगविक्रियाः। परावज्ञादिनानापराधजन्यो मौनवाक्पारुष्यादिकारणीभू २३
तः। चित्तवृत्तिविशेषोऽमर्षः। यथा। मथ्नामि कौरवशतं समरे न कोपाद्दुःशासनस्य

रुधिरंपिबाम्युरस्तः।संचूर्णयामिगदयानसयोधनोरूसंधिंकरोतुभवतांनृपतिःपणेन
।अत्रदुर्योधनादिसुतोऽधि—क्षिप्तोविभावः।परुषभाषणाद्यनुभावः।लज्जादयोवि
क्रियागोपोवहित्थाख्यमवित्थया।व्यापारांतरसंगित्ववदनानमनादयः।उदाः।अ
अवगम्यगुह्यकगणादितितन्मनसः।प्रयंप्रियसुतस्यनयःनिजगोपहर्षमुदितंमघ
वानयवर्त्मगाप्रभवतांह्रिधियः।अत्रप्रयोजनाविष्कारोविभावः।विषयांतरसंचारोऽ
नुभावः।हिष्टेपराधदौर्मुख्यचौर्यैश्चंडत्वमुग्रता।अत्रखेदशिरःकंपतर्जनताडनादय
ः।उदाः।यथाममगुरुगीर्वाणदुरवस्थितःकृतस्त्वयाममायंभगिनीपतेःकृतेज्वलपरस्य
यंमेपरश्वधुर्भयेनतेपदंकिमात्मममधुनापिनाप्यते।अत्रमातृकर्तृकःकार्तवीर्यसभाजन
रूपोऽपराधोविभावः।तर्जनादयोऽनुभावाः।भ्रांतिच्छेदोपदेशाभ्यांशास्त्रादेस्तत्त्वधीर्मति
ः।स्मरेताधृतिसंतोषौबहुमानस्तथात्मनि।उदाः।ममपुत्राःकलत्राण्येषबांधवोपिविमुदि
तेतत्रसुगंतकाले।निःक्लासयिष्यंतियदात्मगेहाद्धर्मस्तदामेभवितासहायः।अत्रशास्त्रप

गमनं विभावः। धर्मे सहायत्वावधारणमनुभावः। व्याधयः संनिपाताद्या हर्षशोकभया
२४ दिभिः। हास्यप्रलापरुदिताद्यनुभावस्तयोदितं उदा०। हृदये कृतशैवलानुषंगा मुहुरं
गानि यतस्ततः क्षिपंती। नदुदंतपरे मुखे सखी नाम तिरीनाभि यमादधाति दृष्टिं। विरहोऽत्र
विभावः। अंगक्षेपादिरनुभावः। उत्संगहर्षशोकादेरुन्मादश्चित्तविप्लवः॥ तस्मिन्नस्था
नरुदितगीतहासाऽसितादयः। उदा० मम। हसति रोदिति गायति सुस्वरं हरि हरीति हि
रेति च पत्यपि। सपदि तिष्ठति चित्र इव। स्थिता प्रतियदं यदुनंदन नः सखी। अत्र विरहो
विभावः। अस्थानहासादयोऽनुभावाः। जीवस्योत्क्रमनारंभो मरणं परिकीर्तितं। संमो
हेंद्रियसंज्ञानिगात्रविक्षेपणादिकृत। अत्र च मरणस्थाने केचित्करुणां पठंति। सैव
परदुःखप्रहरणेच्छारूपत्वाच्चित्तवैक्लव्यमयाच्छोकात्र नातिरिच्यत इति तन्न ल्यानमत्रा शिवः
नुचितमित्येको अमेवत्रसाहोत्स्थापितायाः तस्यादयावीरस्थायित्वं इत्यत्र तन्नपाना २४
नोच्चिसंइत्याहुः। नचात्रसंचारित्वात्क्षणनं फलवदिति वाच्यं। स्थाय्यंतरसाधारणत्वात्।

नेयि हि वाचनसंचारिणः। तदुक्तं। शृंगारवीरयोर्हासो वीरे क्रोधस्तथा मतः। शान्ते जुगुप्सा क
थिता व्यभिचारितया पुनः। तथा च विरहरोगादिजन्या मूर्छारूपा मरणप्रागवस्था मरणं। न
चात्र प्राणवियोगात्मकं मुख्यं मरणमुचितं ग्रहीतुं चित्तवृत्त्यात्मकेषु भावेषु तस्याप्रसक्तेः
। भावेषु सर्वेषु कार्यकालवृत्तितया प्राणशरीरसंयोगस्य हेतुत्वात्। उदा०। दयितस्य गु
णाननुस्मरंती शयने संप्रति या विलोकितासीत्। अधुना खलु हंत सा कृशांगी गिरमंगी
कुरुते न भाषितापि। प्रियविरहोऽत्र विभावः। वचनविरामोऽनुभावः। गर्जितादेर्मनःक्षोभस्त्रासो
ऽत्र त्वं पितादयः। यदाह। आत्यातिकैर्मनःक्षेपस्त्रासः कंपादिकारकः। इति तथा च भीरोर्घो
रसत्वदर्शनस्फूर्जथुश्रवणादिजन्मा चित्तवृत्तिविशेषस्त्रासः। अनुभावाश्चास्य रोमां
चकंपस्तंभादयः। उदा०। आलीषु केलीरभसेन बाला मुहुर्ममालापमुपालपंती। आरा
दुपाकर्ण्य गिरं मदीयां सौदामिनीयां सुषमामवाप्सीत्। अत्र पत्न्याः स्ववचनाकर्णनं वि
भावः। पलायनमनुभावः। अत्र लज्जायाः प्राधान्येन प्रतीतौ त्विदं पद्यं उदाहरणं।

यथा वा मम ॥ मा कुरु कशां कराब्जे करुणावति वेपते मम स्वांतं । खेलन्न जातु गोपैरंब वि
२५ लंबं करिष्यामीति । ऊहो वितर्कः संदेहो भ्रूशिरोंगुलिनर्तकः । संदेहानंतरं जायमान ऊहो
वितर्कः स च निश्चयानुकूलः । चंद्रः निशि भानुरुदेति शंकया दुरयत्नेन मया कालं वि
तः ॥ किरति स्फुटमन्यथा कथं करमंगारसमं समंततः । चंद्रमुदित्य पतापजनन कोयं भानुर्न चे
ति विरहिणो राघवस्य संदेहोत्र विभावः । भ्रूविक्षेपाद्यत्राक्षिप्ता अनुभावाः । अथ कथमस्य
संख्यानियमः । मा स्मयेद्धि गर्दभेर्ष्या विवेकनिर्णयत्वे व्यक्षमा अनुत्कोलं ग विनयसंज्ञा
यथा च्योरीनामपि तत्र तत्र लक्ष्येषु दर्शनादिति चेन्न । उक्तेष्वेवैषामंतर्भावे तत्संख्या
नियमानुपपत्तेः । असूयातो मात्सर्यस्य त्रासावेगाभ्यामुद्वेगस्यावहित्थातो दंभस्याम
र्षेर्ष्याभ्यामतेर्विवेकनिर्णययोर्दैन्यातः क्षौ व्यस्य धृतेः क्षमाया औत्सुक्या लुत्तुको शिवः
त्कंठयोर्लज्जाया विनयस्य तर्कात्संशयस्य चापल्याद्धार्ष्ट्यस्य च भेदाभावात् । सूक्ष्मेपि २५
भेदे नांतरीयकतया न दनतिरिक्तत्वस्यैवाध्यवसायात् संभवति मुनिवचनानुपालभ

भनेउक्तंस्खलतायात्रअनौचित्यात् । एषुचसंचारिभावेषुमध्येकेचनकेषांचनविभावाअ
नुभावाश्चभवंति । तथाहिदुर्व्यापानिर्वेदंप्रतिविभावत्वमसूयांप्रतिचानुभावत्वंचिंता
यानिद्रांप्रतिविभावत्वमौत्सुक्यंप्रतिचानुभावत्वंइत्यादिस्वयंविज्ञेयं । अथाभासाः ॥
तेचरसाभासाभावाभासरूपाः । आभासत्वंचैषांस्थायिभावादीनांअनौचित्यप्रवर्त्ति
तत्वेन । तत्ररतेरनौचित्यंगुरुपत्नीविषयायानायकनायिकयोर्मध्येएकमात्रनिष्ठाया
:पश्वादीनांचपरस्परनिष्ठायाएकनायिकायाबहुनायकविषयायाइत्यादिलोकव्य
वहारात्ज्ञेयं । तत्रशृंगारवत्शृंगाराभासोपिद्विविधः । संयोगाभासोवियोगाभास
श्चक्रमेणोदाहरणानि । सर्वेपिविस्मृतिपथंविषयाःप्रयाताविद्याप्रमादगलिताविमु
खीबभूव । साकेवलंहरिणशावकलोचनामेनैवापयातिहृदयाद्गुरुधर्मपत्नी ॥
ब्रह्मन्नध्ययनस्यनैषसमयस्तूष्णींबहिःस्थीयतांस्वल्पंजल्पबृहस्पतेजडमतेनैषा
सभावज्रिणः । वीणांसंहरनारदस्तुतिकथालापैरलंतुंबरोसीतारत्नकभल्लभिन्नहृ

दयः स्वस्त्रीनलं केश्वरः। ददौ सरः पंकजरेणुगंधि गजाय गंडूषजलं करेणुः। अर्द्धोपभुक्ते
२६ नबिसेन जायां संभावयामास रथांगनामा। स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे वि
26 लेभे कः प्राणान्रणमखमुखे यं मृगयसे सुलग्ने को जातः शशिमुखि यमालिंगसि ब
लात्तपः श्रीः कस्यैषा मदननगरि ध्यायसि तु यं। शतेनोपायानां कथमपि गतः सौ
धशिखरे सुधाफेनस्वच्छे रहसि शयितां पुष्पशयने। विबोध्य क्षामांगीं चकितनय
नां स्मेरवदनां सनिश्वासं श्लिष्यसहह सुकृती राजरमणी। अयं संयोगाभासः। अच
कमत्त सपल्लवां धरित्रीं मृदुसुरभिं विरहय्य पुष्पशय्यां। भृशमरतिमवाप्य तत्र तस्या
सुखशीतमुपैतुमंकमिच्छा। अयं वियोगाभासः। एवं कलहशीलकुपुत्राद्यालंबन
तया वीतरागादिनिष्ठतया च वर्ण्यमानः शोको ब्रह्मविद्यानधिकारिशूद्रादिगतत्वे शिवः
ननिर्वेदः कदर्यकातरादिगतत्वेन पित्राद्यालंबनत्वेन च क्रोधोत्साहौ ऐंद्रजालिका २६
द्यालंबनत्वेन विस्मयः गुर्वाद्यालंबनत्वेन च हासः महावीरगतत्वेन च भयं यज्ञीय

पशुध्न दुर्मांसासृगाद्यालंबनं तयाचर्व्यमाणाजुगुप्साचरसाभासः।भावाभासोयथा
।राकासुधाकरमुखीतरलायताक्षीसास्मेरयौवनतरंगितविभ्रमास्या।त्वत्किं करोमि
विदधेकथमत्रमैत्रींतत्स्वीकृतिव्यतिकरेवद्गवाभ्युपायः।अत्ररतेर्व्यभिचारिणोपित
थात्वात्।यथावाममभुजंगमालायसुधारसेनरसेनकाचित्समरितर्पयंती।देवाद्गुये
तांसमविधेसयत्नौनिरीक्ष्यतंनिंदतिसास्मसद्यः।अत्रासूयायानौचित्यप्रवर्त्तिता।यथावा
मम।मातंगकुंभतटतुंगपयोधराणामेणीदृशांभवतियत्रमनोहराणां।गंगातटेनि
कटएवसमागमःसावाराणसीरसिकनर्मभरैकहेतुः।अत्रकीदृशीवाराणसीतिती
र्थविषयकेकस्यचित्प्रश्नेयुवतीजनसमागमाभिधानत्वेनोत्तरमूलीभूतंतादृशंस्म
रणमनौचित्यप्रवर्त्तितं।यथावा।नैवनःप्रियतमोभययथासोयद्यमुंनशृणुतेशृणुते
वा।एकतोहिधिगमुमगुणज्ञमन्यतःकथमदःप्रतिलंभः।अत्ररतेरनौचित्येनतसंचा
रिणोर्विषादचिंतयोराभासता।यथावा——।कश्चित्कराभ्यामुपगूढनालमालोलप

त्राभिहतच्छिरेफं। रजोभिरंतःपरिवेशबंधि लीलारविंदं चमयांचकार। अत्र रतेराभास
२७ त्वेनन संचारिणश्चापस्यापराभासता। एवमन्येष्वुदाहार्याः॥ भावशांत्यादिरपि भावए
27 व। तदुक्तं। भावस्य शांतिरुदयः संधिः शाबलता तथा। चर्वणीयोरसांगत्वाद्भावान्नैवाति
रिच्यतइति। संधिरेककालमेव तुल्यकक्षयोरास्वादः। शाबलता तु कालभेदेन निरंतर
तया पूर्वपूर्वोपमर्दादिना। न च भावस्य शबलतायाः शांत्युदयाभ्यामविशेषः शांते
रुदयस्य वा। एकैकस्यास्वादेन हृदयोपगमात्। तत्र भावशांतिर्यथा। तस्याः सांद्र
विलेपनस्तनतटप्रश्लेषमुद्रांकितं किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्य
ते। इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशान्वा
द्यापि तद्विस्मृतं १ अत्र कोपस्य शांतावेव चमत्कारविशेषः। यथा वा मम। अश्रूद्ग शिवः
रपरिखाति दुर्गमे स्ताप्यतुंगकुचशैलसंकटे यत्र धुन्वति धनुः सुदुःखिताः पाल २७
यंति पृथुकानरिस्त्रियः॥ अत्र वैरिवनिताकर्तृकस्य बालरक्षणस्यावधारणे रोदनपूर्व

कृशानुपुत्राणांजीवत्वचवर्णनेनराज्ञः क्रोधोऽभ्युदयोः शांतिर्व्यज्यते।यथावाममम।अ
द्यैदैववशात्तो भवन्ममक्रूरवानरवरेणसंगरः।एवमुक्तवति पांथतांप्रियेसुंदरीनयनश्रो
णिमाभजत्र।अत्रसुंदरीनयनश्रोणिमत्र: पांथत्ववर्णनेनकोपस्यशांतिर्व्यज्यते।एवमन्ये
पिउदाहार्याः।भावोदयोयथा।एकस्मिन्नायनेविपक्षरमणीनामग्रहेमुग्धयासूत्री। द्यो ४
नामपरिग्रहश्रपितयाचाहून्निकुर्वन्नपि।आवेगादवधीरितःप्रियतमस्तूष्णींस्थितस्त
त्क्षणान्माभूत्सुभद्रेवसमंदवचितग्रीवंपुनर्वीक्षितः।अत्रौत्सुक्यस्योदयः।यथावा
मम॥मानिनीसन्नुनयस्तुचाटुभिर्वीक्ष्यकोपकुटिलांचतत्भ्रुवंयकुतुः स्मरणजातवे
पथुर्जोऽभ्रमेतिहिनन:पदेपदे।अत्रत्रासस्योदयः।यथावामम।यस्यखड्गगतकालि
माछुषामाननेषुवितनोत्तुकालनती।एतदेवबकुचित्रमेषु यत्रश्वेसमर्जयत्तिने
त्रशोणिमा।अत्रभयस्योदयः।यथावामम।पीतमस्तदयमन्यकांतयावीक्ष्यमुग्ध
मधरंनतभ्रुवा।चुंबितुंत्वरणेनमपिकेवलंकांतकांतवदनंविलोक्यतेअत्रचुंब

राम· नत्वराविशिष्टया नायिका यावच्चुंबनं विहाय केवलं मुखावलोकनवलनेन कोपाख्योदयो
२८ व्यज्यते। यथा वा मम। वालुकाविहितभित्तिभेदनं कर्तुमंचितवहह छरासने। यत्र नम्र
वलयादिध्वसरणं नाचरंति रिपुभूपतिस्त्रियः। अत्र स्रुतेपि वलयधारणेनुपपन्नमेवा
28 स्मत्स्वामिनां वधस्य राज्ञा कारिष्यमाणत्वात्तद्धृयेति मतेरुदयो व्यज्यते। यथा वा मम।
बाणभिन्ननिजभालसंस्थितां वीक्ष्य खजमुकुरे विधेर्लिपिं। राज्यभोगविनिवृत्त
चेतसः शत्रवो दधति यस्य वन्यतां। अत्र शत्रुनिष्ठस्योत्साहस्य शांतिर्व्यज्यते। ए
वमन्यदप्युदाहार्यं। भावसंधिर्यथा। स चान्योन्यानभिभूतयोरन्योन्याभिभावनयो
ग्ययोर्भावयोः सामानाधिकरण्यरूपः। उच्छिन्नस्य ततयः पराक्रमनिधेरभ्यागमादेक
तः सत्संगप्रियता च वीररभसोत्कालश्च मां कर्षतः वैदेही परिरंभणं च मुञ्चैतन्यमा ।शिवः
मीलयन्नानंदी हरिचंदनेंदुशिशिरस्पर्शो रुणद्ध्यन्यतः। अत्र पूर्वार्द्धे संभ्रमात्मकः २८
आवेगः उत्तरार्द्धे धैर्यं। अनयोस्तुल्यमेवास्वादः। शबलता यथा। क्वाकार्यं शशलक्ष्मल

क्षमाणः क्व च कुत्र भूयोपि दृश्येतैसा दोषाणां प्रशमायनः श्रुतमहो कोपेपि कांतं मुखं। किंच
ध्वंस्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योधरं
धास्यति। अत्र शंकाकार्यं इत्यादौ वितर्कः। भूपापीत्यौत्सुक्यं दोषाणामिति मतिः। कोपे इति
स्मृतिः। किं वक्ष्यंतीति शंकाः स्वप्नेपीति दैन्यं चेतः स्वास्थ्यमिति धृतिः। कः खल्विति चिंता। पू
र्व पूर्वोपमर्देन प्रतीयमानानां शबलता चमत्कारभूमिः॥ यथा वा मम। पापी हंत मया हतेन वि
हितं सीतापि यद्यापिता सा मामिंदुमुखी वने बत विना किं जीवितं धास्यति। आलोकेय कं
थमुखानि कृतिनां किं ते वदिष्यंति मां राज्यं यातु रसातलं पुनरिदं न प्राणितुं कामये। अत्र
मत्यसूयाविषादस्मृतिवितर्कव्रीडाशंकानिर्वेदानां शबलता। यथा वा मम। पत्रेपत्त्वाश्चि
त्युलनचपलनेरे काल्वराहं कुमारी हस्तालंबवितर हहहहा मुंच कमः क्वासि यासि प्रलब्धं भूमेः
परिहृत भव द्विद्विषो रणप्रवृत्तेः कन्या काचित्स्फुरन्नवकिसलनयान्यादृशानाभिधत्ते। अत्र त्रा
कासूयाधृतिस्मृतिश्रमदैन्यमत्यौत्सुक्यानां शबलता। यथा वा मम। गंतव्यं पुनरेव तत्र हं

राम. हहा साधुः खिन्ना मां विना बुद्धेः कोपमुपयास्यत्वः परमियं स्वरक्षा कथं रक्षास्यति । प्रत्यावृत्य स गतेह
२९ सिष्यति जनः सर्वोपि लोकोत्तरः स्नेहः सारसमारसोदरदृशां स्तस्याः पुनस्तादृशाः । अत्र गोत
मं दृष्ट्वोत्सुक्यं तत्रेति स्मृतिः । हहेहेति खेदः । दुःखितेति दैन्यं । बुद्धिरिति धैर्यं । परमिति चिंता
। प्रत्यावृत्येति शंका । लोकोत्तर इत्यावेगः । तादृशा इति स्मृतिः एतेषां भावानां शाबल्यं । अत्र च
भावशाबल्यत्वं भावानां बाध्यबाधकभावापन्नानां उदासीनानां वा आमिश्रणं । एकचमत्कृ
तिज्ञानविषयत्वमिति यावत् । तदुक्तं नारिकेरजलक्षीरसितकलाजलमिश्रणे । विलक्ष
णो यथास्वादो भावानां संहतौ तथा । अत्रेदं बोध्यं य एते भावशांत्युदयसंधिशाबल्यता
ध्वनय उदाहृतास्तेपि भावध्वनय एव विद्यमानतया चर्व्यमाणेष्वेव तत्तत्स्वविच्छिन्नत्वविन
श्यद्वस्तुत्वसंधीयमानत्वपरस्परव्यामिश्रत्वैः प्रकारैश्चर्व्यमाणेष्वेषु भावेष्वेव प्राधा शिवः
न्यस्यौचित्यात् । चमत्कृतेस्तत्रैव विश्रांतेः ननु भावस्य शांत्यादिवत्स्थितिरपि प्रकारः सं २९
भवत्येव तत्कथं नोक्त इति चेन्न । भावोक्तैव तदुक्तेः । भावस्थिते र्भावाभिन्नत्वात् । ननु

व्यभिचारिस्थले नियमतो मुख्यरसस्यावस्थानं तत्कथं भावोदाहरणमेतत् कथं वा भाव
ध्वनित्वं । रसांगत्वेन तेषां गुणीभावात् । इति चेन्न । रसस्य मुख्यत्वेपि व्यारोपित प्राधान्य
स्य भावेषु सत्वात् तदुक्तं काव्यप्रकाशकारैः । मुख्ये रसेपि तेंगित्वं प्राप्नुवंति कदाचन । भृ
त्यैरनुगम्यमानो वै वाह्याद् इव सेवकाः । ते भाव भाव शब्दं स्यादयः । कदाचनेति यदा त एवांगि
त्वेन विवक्षिताः । प्राधान्याप्राधान्ययोः कविविवक्षाधीनत्वादिति निर्गलितोर्थः । अत्र
त्रेदं विचार्यते । ननु तेषु भावेषु किं नाम भावत्वं । विभावानुभावभिन्नत्वे सति रसव्यंजक
त्वमिति चेन्न । रागादिष्व— तिव्याप्तेरिति चेत् विभावानुभावव्यज्यमाननिर्वेदाद्यन्यतमत्वं
। पदार्थः । व्यभिचार्यंजितो भाव इति । निर्वेदादीनां च सामाजिकगतानामवस्थायिभावा
न्यायेनाभिव्यक्तिः । विभावानुभावौ चात्र व्यंजकौ । ननु कस्मिन् व्यभिचारिणि ध्वन्यमाने
व्यभिचार्यंतरं व्यंजकतया वन्यमपेक्ष्यते तस्यैव प्राधान्यापत्तेरित्यास्तां विस्तरः ॥ ॥
॥ इति श्रीकुलभूदेवविरचिते रसविलासे भावनिरूपणं नाम तृतीयः स्तवकः ॥ ॥३॥

रसग्रंथ० ॥ मालायै नमः ॥ अथैषामुत्कर्षाधायकत्वेन स्मृतान् गुणांस्तावन्निरूपयंते ॥ तत्र सामान्यलक्ष
णं काव्यप्रकाशे । ये रसस्यांगिनो धर्माः शौर्यादय इवात्मनः । उत्कर्षहेतवस्ते स्युरचलस्थि
३० तयो गुणा इति । अंगिनः शरीरे स्वात्मतया प्राधान्येन काव्ये स्थितस्य रसस्य धर्माः साक्षात्तदा
30 श्रिता इत्यर्थः । अचलस्थितय इति अपृथक्स्थितयः । अव्यभिचारिस्थितय इति यावत् ।
अव्यभिचारेण च रसेन तदुपकारेण चेतनरसं विना ये नावतिष्ठंते ऽवतिष्ठमानाश्चावश्यं पर
सं उपकुर्वंतीत्यर्थः । एवं च रसोत्कर्षहेतुत्वे सति रसधर्मत्वं । तथात्वे सति रसाव्यभिचारि
स्थितित्वं च गुणसामान्यलक्षणं । ननु रसधर्मत्वमेषामसिद्धं । कथमन्यथा नीरसेऽपि सु
कुमारवर्णनाल्लितिति । इह समदृशा भुक्तवानी । रन्विरहत्वस्त्र सवसुराभिन्नीत्तस्वच्छतोयावहं
ति । फलभरपरिणामश्यामजंबूनिकुंजस्खलनमुखरभूरिस्रोतसो निर्झरिण्य इत्यादौ । शिवः
मधुरादिव्यवहारः सेरे वस्यपि दृढकवर्णाभाववति शून्यं वासगृहं इत्यादौ चामधुरादि ३०
व्यवहार इति चेदुच्यते । शौर्यादयस्तावदात्मन एव धर्मा इत्यविवादं ॥ दृष्टेऽपि तेन्तु च वि

दश्शूरेण्याकारमहत्त्वादियोगिनिश्शूरव्यवहारः।शूरेण्याकारलाघवादियोगिन्यशूरव्यव
हारश्चतत्तस्यहेतोरयथार्थचित्तशूरव्यवहारविषयेवितताकृतिदर्शनादाकारएवास्य
शूरइत्यौपचारिकव्यवहाराच्चाभियुक्तानामाकारएवैतादृशःशूरपदवाच्यइतिविपर्या
साद्दूरदर्शिनस्तथाव्यवहरंति।तत्त्वज्ञास्तुक्वचिदुपचारस्तइतिवक्तव्यं।हंतैवंमधुरा
दिरसोपि।योगिनस्तुकुमारादिवर्णयुक्तेमधुरादिव्यवहाराद्गुणएवायंमधुरादिरित्यौपचा
रिकव्यपदेशाच्चाभियुक्तानांवर्णएवैतादृशोमाधुर्यभागिनिविपर्ययाद्रसपर्यंतादृगा
हिबुद्धिविधुरास्तथाव्यवहरंतितत्त्वज्ञास्तुक्वचिदुपचारादितितुल्यमेतत्।ननुशौर्या
दावात्मवृत्तित्ववत्।मधुरत्वादीनांरसवृत्तित्वव्यवस्थितौएवंस्यात्तसैवत्वसिद्धा।।विनि
गमकाभावादितिचेन्नैवं।भवत्येवविनिगमकाभावोप्यदित्वयावर्णमात्राश्रयाणुगुणाःस्त्री
कर्तुंशक्यंतेनत्वेवंअविशेषेणस्वनाय्यामपितदभ्युपगमात्।तथाचरसमात्रवृत्ति
त्वलाघवंवर्णरचनोभयवृत्तित्वेतुगौरवं।यतश्चैवंअतएवमाधुर्यादयोरसधर्माःस

रसग्रंथ० सुश्लिष्टैर्वर्णादिभिर्व्यज्यंते इति फलितं। माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश। आह्लादक
३१ त्वं माधुर्यं शृंगारे द्रुतिकारणं। करुणे विप्रलंभे तच्छांते चातिशयान्वितं। द्रुतिश्चेतसो गलितत्व
31 मितद्वेषाजन्यकाठिन्याभावः। तथा च यच्छ्रवणेन श्रोतुर्विमनस्कत्वेव संपद्यते तदाह्लादक
त्वस्वरूपं माधुर्यमित्यर्थः। यदुक्तं। गलितत्वमिवाह्लादपरव्याद्रुतयेद्धत। माधुर्यं ना
म शृंगारे प्ररोहं गाहते गुणः। द्वेहं चिसमत उक्तं शृंगारे इति संयोगे इत्यर्थः। विप्रलंभेति
न्यायस्य पक्वत्वात्करुणादौ विशेषमाह। करुणे इति। संभोगात्करुणे तस्माद्विप्रलंभे ततो
पि शांते तिशयितं माधुर्यं द्रुत्यंतस्तु विशेषो यत्संभोगे विप्रलंभे च नः सपत्नं तद्दिष्यते। जु
गुप्साद्यन्वयाच्छांते तु विद्धं त्वोजसापि तदिति। ओजो लक्षणमाह। दीप्त्यात्मविस्तृतेर्हेतु
रोजो वीररसस्थितिः। बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण तु। दीप्तिस्वरूपतया मनसो। शिवः
ति विस्तृतिः। ज्वलितत्वमिव तथा च यच्छ्रवणात् ज्वलितमिव मनो जायते तदोज इत्यर्थः। वी ३१
रे रसस्तत्राह। वीररसस्थितिरिति। अस्याधिकरणांतरमाह बीभत्सेत्यादि। वीराद्बीभ

मेतत्तोपि रौद्रे चित्तदीप्तेः कार्यायाः सातिशयत्वात्तयाकारणमोजः क्रमेणोत्कर्षवत्त्वदेतत्
वीररौद्रयोर्निः प्रतिपक्षसंबीभत्सेतु सौकुमार्यबाल्लानुविद्धं इति विशेषः। प्राधान्येन मा
धुर्योजसोरेकैकविधानमत्रप्रक्रांतं अतोहास्याद्भुतभयानकेषु नाकिंचिद्विहितं। तेषुभ
येगुणप्राधान्यात्। प्रसादलक्षणमाह। शुष्केंधनाग्निवत्स्वच्छजलवत्सहसैव यः। व्याप्नो
त्यन्यत्प्रसादोसौ सर्वत्रविहितस्थितिः। ओजसिशुष्केंधनाग्निवत् माधुर्ये स्वच्छशर्करा
जलवत् योगुणोन्यत् व्याप्यं चित्तं झटित्येव रसेन व्याप्नोति सप्रसादः। अयं सर्वेषु रसे
षु आधेयतया सर्वासु रचनासु अंगपतया स्थितः एतदाह॥ सर्वत्रविहितस्थितिरिति
। कथं तर्हि लत्ववेदिनामपि शब्दार्थयोर्मधुरादिव्यवहार इति चेत् गुणवृत्त्या पुनस्तेषांवृ
त्तिः शब्दार्थयोर्मता। गुणवृत्तिरुपचारः। आकारे शौर्यस्येव व्यंजके सुकुमारवर्णादौ नतुप
चार इत्यर्थः॥ तेषांगुणानां केकस्य व्यंजका इत्याकांक्षायामाह। मूर्ध्नि वर्गांत्यगाः स्पर्शा अ
टवर्गा रणौ लघू। अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा। माधुर्ये व्यंग्ये टवर्गरहिताः कादि

घोमावसानौ रेफणकारौ चेति वर्णाः। तत्र कादयो मूर्द्धि स्ववर्गान्त्यवर्णगताः यथा पुञ्जभ्रमदङ्ग
गाङ्गङ्गात्त किं कुंकुमाङ्कसङ्गसाद्रो रेफणकारौ तु ह्रस्वस्वरान्तरितौ। वृत्तिः समासरहितस्य चाभा
वो मध्यमसमासो वा। घटना तथेति सौकुमार्यवती सुकुमारपदानां ताद[illegible]पदानां तरयोगेन रचने
त्यर्थः। वर्णसौकुमार्यवती रचने सुस्वादयत् सौकुमार्ये वर्णसौकुमार्यादेव लब्धोपि पदान्त
रयोगेन सौकुमार्यस्याभावघटनातथ्येऽस्य सुकुमिति। उदा॰ अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरं
गीकृतमानताङ्ग्याः। कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि॥ योग आ
द्यतृतीयाभ्यामन्त्ययोरेण तुल्ययोः। टादिः शषौ वृत्तिदैर्घ्यं गुंफ उद्धत ओजसि ओजसि
वर्गे वर्गप्रथमतृतीयाभ्यां सह तदन्तयोर्द्वितीयचतुर्थयोर्योगः। यथा कच्छ पुच्छे सादि।
तथा रेफेण अधउपरि उभयत्र वा यस्य कस्यापि योगः। उदा॰ वक्रार्क निर्ह्रादादयः। तथा तु शिवः
ल्ययोः वयोः द्वित्वयोगः। यथा चित्तं वित्तं सा दो तथा टादि चतुष्टयं शषौ चेति वर्णाः समा ३२
सस्तु दीर्घः गुंफो रचना चोद्धता विकटेति। उदा॰ मूर्द्धमुद्वृत्तकृत्ताविरलगलगलद्रक्त

संसक्तधाराधौतेऽङ्घ्रिप्रसादोपनतजगज्जातमिथ्यामहिम्नां । कैलासोल्लासनेच्छाव्यतिक
रपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत्प्रयास इति ॥ यथा
वामम । यस्मिन्नमसुनरेण धुन्वति धनुर्गाढं जनश्यामलप्रद्योतक्षतविन्दुधौतविगलत्सा
टीरयं काकुत्स्थः । भ्रश्यद्भूषणवज्रकंटकघनीभावं व्रजत्स्यंतरात्रासाभिद्रुतसर्वदेवसुदृ
शांपं थापुरात्तुस्तरः प्रसादलक्षणमाह । श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् । सा
धारणः समग्राणां स प्रसादो गुणो मतः । येन शब्देन समासेन वाक्यरचनया वा श्रुतिमात्रे
ण शब्दादर्थप्रत्ययः स प्रसादो व्यंजकः स्वार्थः । उदाः परिम्लानं पीनस्तनजघनसंगादुभय
तस्तनोर्मध्यस्यांतः परिमिलनमप्राप्य हरितं । इदं व्यस्तन्यासं संश्लिष्टशिथिलितभुजाक्षेपचल
नैः कृशांग्याः संतापं वहति नलिनीपत्रशयनं । अत्र मधुरो माधुर्यः प्रसादो व्यापकः । यथा
वामम । कर्णस्थले कृतरिदे वितरन्तु विरतिं यां तु दुःस्थास्यति प्रायश्चोमे भीष्मः शौर्योति भी
ष्मः प्रधिगतिविभवच्छिल्लुरेषोस्मि जिष्णुः । अत्र ओजो व्याप्यं प्रसादो व्यापकः । यथा वामम ।

 दूर्येणास्त्वेन सौरैरपि करनिकरैः कोइवेयस्त्ववलीनकपातोऽपी ऐहालाहलबहलतरैरंतरू
 ष्मायमाणाः व्यात्तैर्वक्त्रैरुरोभिर्घनघनजघनैः फेनजालं स्फुरंतो मध्ये श्रोमन्नः कथंचिद्विद
धाति विरतिं सत्त्वयः सप्तसप्तिः। नीरसे च माधुर्योजसोरभावेऽपि प्रसादः सचोयचाराद्दुर्ल
 भिष्ट एव वस्तुतस्तु नात्र प्रसादोऽपि तस्यैकरसधर्मत्वात्। यथा मम। अलंकारे ज्ञानं स
कलनटशास्त्रपरिचयः सदान्यायेदृष्टिः परपुरुषसेवा न वरसे। रतिर्धर्मे प्राप्या निजवि
भवपोष्यं गुरुकुलं मम स्पर्द्धा दामोदरमहागहस्थानान्यपुरुषैः। पंडितमुद्दिश्य एतेन मम
सदैव स्पर्धेति वदंतं सदैव स्पर्द्धं तमसत्यविदं प्रति न त्वया समानशीलेनास्माकं स्पर्द्धापि तु
समानशीलयां दामोदरधर्मपत्न्या लक्ष्म्या सह अभिप्रायकोऽयं श्लोकः। मम हि अलंकारशास्त्रे।
ज्ञानं नाटकेषु परिचयः सर्वदान्यायशास्त्रे दृष्टिः शृंगारादिनवरसे। परानुरूक्षा ये पुरुषा 
राजानः तेषां सेवा। धर्मप्राया बुद्धिः स्वार्जनायोष्यं गुरूणां पितृचरणानां कुलं कुटंबं। लक्ष्म्या 
मप्यागतायां आभरणपरिधाने ज्ञानं नृत्यादौ कुशलता। सर्वदान्यायस्य व्यवहारस्तु

त्वात्तन्यायेनानेपरपुरुषोविलुप्तस्तस्यसेवा। धर्मस्यधायजोऽन्यमूलकत्वात्तद्बुद्धिर्धर्मभ्या
पात्लक्ष्मीपात्रेणहिस्वकुटुंबपोषणं क्रियतइतितयैवसहास्माकंस्पर्द्धानत्वयावैधर्मज्ञा
त्विनेति। अस्यायोषितोगर्वोत्तवंरूपः प्रसादश्चगुणः। श्रुतिमात्रेणशब्दादर्थद्वयस्यपु
गपत्प्रत्ययात्। तृतीयोप्यर्थस्तथैवप्रतीयतइतिचेन्न सतात्पर्यविषयः प्रसादावि
घटकोवेति। अन्येषांतुवर्णानांस्पर्शटवर्गादिभिन्नानामुदासीनत्वमितितदुक्तं पाद
नेपुराणच्छायेसुच्यते नन्वेवंमाधुर्यादावुद्धतारचनायाः सर्वत्रविरुद्धाः स्फुरितिचे
न्न। यद्यपिगुणपरतंत्रारचनादयस्तथापि। वक्तृवाच्यप्रबंधानामौचित्येनक्वचित्क्व
चित्। रचनावृत्तिवर्णानामन्यथात्वमपीष्यते अन्यथात्वंगुणपारतंत्र्याभावः वक्तृ
वाच्यप्रबंधौचित्यविरहेणवगुणपारतंत्र्यस्वीकारात्। तत्रापिवक्त्रौधांगव्यक्त्रौउप
योगात्। तत्रक्वचिद्वाच्यप्रबंधनपेक्ष्ययावक्त्रौचित्यादेवरचनादयः। यथा। मंथाय
स्तार्णवांभःप्लुतिकुहरचलन्मंदरध्वानधीरः कोणाघातेषुगर्जत्प्रलयघनघटामो

रसग्रंथ॰ मसंघट्टचंडः। कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः केनास्मत्सिं-
२५ हनादप्रतिरसितसखोदुंदुभिस्ताडितोयं। अत्र न क्रोधदीप्तरसो व्यंगः। प्रश्नरूप-
34 त्वात्वाक्यस्य प्रबंधश्चनाटकात्माभिनेयइतिदीर्घसमासत्वंप्रतिकूलंयद्यपितथापि
वक्ताभीमसेनइतितदौचित्यादुद्धतारचनात्र। अतः तदुद्धतत्वादिमक्तावेवोपयुज्यते
क्वचित्तुवक्तृप्रबंधौचित्यानपेक्षयावाच्यौचित्यादेवरचनादयः। श्रोदक्षेदानुरूपोछ-
लनरयभवसिंहिकेयोपघातत्रासाकृष्टाश्वतिर्यग्वलिततरविरथ्येनारूढोनेक्ष्यमाणं।
कुर्वत्काकुत्स्थवीर्यस्मृतिमिवमरुतांकंधरारंध्रभाजांभांकारैर्भीममेतन्निपततिवि-
यतःकुंभकर्णोत्तमांगं। अत्रवक्तावैतालिकः। प्रबंधश्चाभिनेयात्मेतिदीर्घसमासानौ-
चित्येपिवाच्यस्यकुंभकर्णस्योद्धत्यादुद्धतारचनादयः। क्वचिद्वक्तृवाच्यानपेक्षयाप्रबं- शिवः
धौचित्यादेवरचनादयः। तथाहि। आख्यायिकायांहिशृंगारेपिअंगेनुद्धतेपिवक्तरिना- २५
तिमसृणावर्णादयः। प्रस्तुतविकटबंधत्वेनछायावत्त्वात्। विप्रलंभकरुणयोस्तु

स्यामपि दीर्घसमासपरीहारः। तयोरति सौकुमार्यात्। कथायां तु रौद्रेपि नात्यंतमुज्ज्वला

वर्णोद्दयः। चर्वणीयमहापुरुषसुखप्रतिपत्तिसमर्पणस्योद्देश्यत्वात्। नाटकादावभिन

येतु रौद्रेपि न दीर्घसमासादयः। चित्तेस्तनाभिनयसौकुमार्यात्। एवं मुक्तकाद्यौचित्यम

नुसरणीयं। तथाहि। एकैकछंदसि वाक्यसमाप्तिर्मुक्तकं द्वयोः संदानितकं। त्रिषु विशेष

कं चतुर्षु कलापकं पंचादिचतुर्दशांतं कुलकं। तत्र मुक्तकेषु कवेरसबन्धाभिनिवेशो

रसाश्रयमौचित्यं नीरसवस्तुबन्धेनाभिनिवेशे तु तथैवौचित्यं। तत्राद्यं यथा। प्रागप्रा

प्तनिशुंभशांभवधनुर्द्वेधाविधाविर्भवत्क्रोधप्रेरितभीमभार्गवभुजस्तंभापविद्धः क्ष

णात्। प्रज्वालः परशुर्भवत्वशिथिलस्त्वत्कंठपीडातिथिर्येनानेन जगत्सुखंडपरशुर्दे

वो हरः ख्याप्यते। अत्र पादत्रये रसोचितारचनादयः क्रोधव्यंजकाः। यत्र तु गुरुस्मरणे

न क्रोधापगमः। तत्र मसृणा एव वर्णो रसुचितो बंधः। द्वितीयो यथा। मम दिशः शून्या

काराश्चपत्नम गत्ष्णामयजनाः समस्तोप्यस्तोयं जननयनको भ्रास्य विभवः। पपःक्षा

रसवी० यीभावं व्रजन्ति सरसि स्वल्पसलिले प्रचंडे मार्त्तंडस्तपत्ति जगतामेषभूरसि। अत्र म
३५ ध्याकरूपरक्षस्तु वर्णेन रूक्षएव बंधः। रसनिवेशाभावे कामचारइत्यपि केचित्। संदा
नितकादिषु काव्यपरिसमासे वैकल्पे दीर्घमध्यसमासताच। प्रबंधगतेषु पुनस्तेषु प्रबं
35 धेचिता एव रचनादयः रसादिस्वयं विभावनीयं स्वयंभावितबुद्धिभिरित्यलं बहुभाष
णेन॥ इति श्रीमच्छुलकभूदेवविरचिते रसविलासे गुणनिरूपणं नाम चतुर्थः स्तबकः
॥४॥ ॥ अर्थवस्तरसंगस्यारसविरोधित्वेन हेयत्वमस्मतेत्वेन प्रसंगाच्च रसादे
षा निरूप्यंते। नानादुःकाव्यप्रकाशाहृतः। व्यभिचारिरसस्थायिभावानां शब्दवाच्य
ता। कष्टकल्पनया व्यक्तिरनुभावविभावयोः॥ प्रतिकूलविभावादिग्रहो दीप्तिः पुनः
पुनः॥ अकांडप्रथमच्छेदावंगस्याप्यतिविस्तृतिः। अंगिनो ननुसंधानं प्रकृतीनां विपर्ययः शिवः
अनंगस्याभिधानं च रसे दोषाः स्युरीदृशाः। शब्दवाच्यता सामान्यतो विशेषतो वा स्वश ३५
ब्देनोपादानं साव्यभिचारिणा यथा सव्रीडादयितानने न सकरुणा मांसंगच्चर्मांबरे

सत्रासा भुजगे सविस्मयरसा चंद्रे ऽमृतस्यंदिनि। सेर्ष्या जह्नुसुतावलोकनविधौ दीना
कपालोदरे पार्वत्या नवसंगमप्रणयिना दृष्टिः शिवायास्तु वः ॥१॥ अत्र व्रीडादयो व्य
भिचारिभावाः स्वशब्देनोपात्ताः न च स्वशब्देनोपात्तेषु व्यभिचार्यादिषु आस्वादसंभ
वोऽनुभूयते किंतु अनुभावादिमुखेनैव व्यक्तेषु तस्मादास्वादानुसन्धिदूषकता बीजं इ
ति प्रांचः नव्यास्तु अत्र यद्यसाधारणानां विभावानुभावानां उपस्थितिः तदा व्यभिचारि
भावानामाक्षेपादेव चर्व्यसक्तिरिति नास्वादविघ्नः यदि तेषां नोपस्थितिस्तदा कारणा
भावादेव नास्वादः एवं च व्यभिचारिभावानां स्वशब्देनोपात्तत्वेन को दोषः रसानां तु विभावा
नुभावानामुपस्थितौ व्यभिचारिणां चाक्षेपावश्यकत्वेन स्वशब्देनोपादानस्य वैयर्थ्या
द्व्यर्थत्वं दोषमाहुः केचित्तु रसभावादीनां व्यंजनावृत्त्येकगम्यत्वमवस्थिते शब्दवाच्य
त्वेवमनाख्येयं दोषमाहुः एवं च स्थिते व्यानम्रा राधिताननेमुकुलितामातंगचर्मांबरे सा
शंकापा भुजगे निमेषरहिता चंद्रे ऽमृतस्यंदिनि मीलज्जह्नुसुरासिंधुदर्शनविधौ म्लाना कपाले।

र॰वि॰
३६
36

दरे इति पादत्रयं पाठे युक्तः एवं भावादिशब्देनोपादानेपि दृष्टव्यं रसस्य सामान्यतो रस
शब्देनोपादाने यथा तामतंगजयमंगलश्रियं किंचिदुच्चभुजमूललोकितां नेत्रयोः कृ
तवतोस्य गोचरे कोप्यजायत रसो निरंतरः अत्र विभावानुभावव्यभिचारिभावैः
शृंगारव्यक्तौ जायमानायामप्यर्थे रसपदं स्वैरं सुसमन्वायकत्वेन सहृदयहृदयवै
मुख्यमापादयतीति नीरूपकताबीजं । एवमग्रेपि विशेषतः शृंगारपदेनोपादाने यथा
आलोकयकोमलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिराममूर्त्तिं पश्येष बा
ल्यमतिदान्तविवर्त्तमानः शृंगारसीमनितरंगितमातनोति । स्थायिनो विशेषतः उत्सा
हपदेनोपादाने यथा संप्रहरणैः प्रहाराणां परस्परं कणत्कारैः श्रुतिगतैरुत्साहस्तस्य
कोप्यभूत् अत्रैव स्थायिभावोस्य कोप्यभूदिति चतुर्थपादपाठे सामान्यतः शब्दवाच्य शिवः
तोदाहरणं दृष्टव्यं कष्टकल्पनया पृथक्श्लोकादीनानुसंधानेन वा विलंबेन व्यक्तिः त ३६
त्रानुभावस्य यथा कर्पूरधूलिधवलद्युतिपूरधौतदिग्मंडले शिशिररोचिषि तस्य

पूनःशीलाग्निरोंशुकनिवेशविशेषत्वमव्यक्तस्तनोन्नतिरभून्नयनलावनौसादेवाद
हमउद्यतयाचपलायतनेत्रयाविमुक्तश्च अविरलविलोलजल्पः काव्यःसमुपागत
श्चायंइत्यादौयथाविश्लेषमेघागमनयोः समानकालप्रतिपादनेनयथानुभावाद्याक्षेप
स्तथानात्रेति अत्रचंद्रादयउद्दीपनालंबनविभावाः शृंगारयोग्याः अनुभावाप्रतीत्या
आस्वादपर्यवसायिनःस्थिताः यद्यप्यंशुकनिवेशोनुभावत्वयोग्यः तथापितस्यस्तन
व्यक्तिप्रयोजकत्वेनोपादानान्नानुभावपर्यवसानमितिप्रांचः नव्यास्तुपुंनिष्ठएवशृंगा
रोत्रप्रतिपिपादयिषितः अभून्नयनावनौसेत्यनेनतस्याएवालंबनत्वप्रतिपादनात्
नचपुंसिकश्चिदनुभावउपात्तः। नचविभावैरप्याक्षेप्याऽर्हः दर्शनस्यवीतरागादिसाधा
रणत्वात्इतिकष्टेनकल्पनीयः। विभावस्ययथापरिहरतिमतिरतिंस्तुनिनेस्वस्वनि
तरांपरिवर्त्ततेचभूयःइतिवतविषमादज्ञास्यदेहंपरिभवतिप्रसभंकिमत्रकुर्मः अत्र
कामिनीरूपःशृंगारविभावोभिमतोनपुनरुपात्तः। नचरतिपरिहारादिभिरनुभावैराक्षे

मुमपि श्राकालेत्तेषां करुणादावपि संभवादिति कष्टेन कल्पनीयः प्रतिकूलविभावादिग्रहः
प्रकृतरसादेः प्रतिकूलो यो रसादिस्तद्विभावानुभावव्यभिचारिणां ग्रहः तत्र तादृशा
विभावव्यभिचारिणोर्यथा ॥ प्रसादे वर्त्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यंत्यंगान्य
मृतमिव ते सिंचतु वचः। निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं न मुग्धे प्रत्येतुं
प्रभवति गतः कालहरिणः॥ अत्र प्रकृते शृंगारप्रतिकूलस्य शांतस्य प्रकाश्यमानाका
लानित्यतारूपो विभावाः॥ एतत्प्रकाशितो निर्वेदरूपो व्यभिचारी च स्फुटमेव गम्यते
। तादृशानुभावग्रहो यथा दृष्ट्वा कांतां कापि कंदर्पकांतं सत्ति ष्ठंतं मध्यभागेण रूणं॥
अत्येकांतं काननं गंतुमैच्छन्मल्लो सर्वकार्यभारं ग्रहस्य अत्र व्याजादिकं विना वनंगम
ने सकलपरिहारश्च शांतानुभावः न च व्याजप्रतिपादितवृत्तिः शृंगारस्य प्रकृतस्य विच्छे शिवः
दः इंधनाद्यानयनव्याजेन संभोगार्थं वनगमनं यदुच्यते तदानुज्ञातानुभावग्रहः पुनः ३७
पुनर्दीप्तिरंगरसादिविषया दोषः अंगिनस्तु सामर्हि भारतादौ शांतादेरिवनवैरस्य

मावहति यथा ऽयमोहयरायपणीमतिविवशिकामवधूर्विबोधिताइत्यादिनादीप्ति
मानीतोपि करुणो ऽथ सा पुनरेव विह्वला वसुधालिंगनधूसरस्तनीत्यादिना पुनर्दीप्ति
नीत उपभुक्तो हि पुनरुपभुज्यमानं परिम्लानस्तबककल्पं रस्यापकल्पते । केचित्तु प्र
बंधे प्रकृतस्य प्रसंगांतरेण विच्छिन्नस्य पुनर्दीपनेन सामाजिकानां सामग्र्येण रसास्वा
दहृतिर्विच्छिन्नदीपनं दोष इत्याहुः । अकांडे नवसरे प्रथनं यथा वेणीसंवरणे द्वितीयेंके
ऽनेकवीरक्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृंगारवर्णने अयं चतन्नद्समस्ता
चनानर्हे तन्नद्समस्तावोचेदाध्ययनसंध्यावंदनदेवपूजानादिधर्मवर्णने प्रसक्ते
कस्यापि कामिन्या सह कस्यचित्कामुकस्यानुरागवर्णनमिव वैरस्यायकल्पते अकां
डे विच्छेदो ऽनर्हे विच्छेदो यथा वीरचरित्रे राघवभार्गवयोरविच्छिन्नप्रसरतायां प्रवृ
त्ते वीररसे कंकणमोक्षापयामीति राघवस्योक्तौ अप्रस्तावे तथा वचनं व्याजेन नि
र्गमं प्रतिपादयन् वीरत्वाभावे पर्यवस्यति ॥ यथा वा समुपस्थिते सु महाहवदुर्मदे

रसवि॰ पुप्रतिभटे पुमर्मभिदि वचनानुहिरस्य नायकस्य संध्याहोमादिवर्णनायां । अंगस्याति
३९ विस्मृतिः अप्रधानस्य प्रतिनायकादेर्नानाविधीनां च संपदां नायकसंबंधिचरितादिभ्य
आधिक्येन वर्णनं यथा हयग्रीववधे हयग्रीवस्य एवं वर्णने नायकस्योत्कर्षेण निमि
38 त्तेन तस्य सुत्वारसयोषाभ्यां न स्यात् न च प्रतिनायकोत्कर्षस्य तदभिभावकनायको
त्कर्षांगत्वात् कथमवर्णनीयत्वमिति वाच्यं यादृशस्य प्रतिनायकोत्कर्षवर्णनस्य तदभि
भावकनायकोत्कर्षांगतासंपादकत्वं तादृशस्यैवत्वात् तद्विरोधिन एव निषेध्यत्वात्
न च प्रतिपक्षस्य वर्ण्यमानोप्युत्कर्षः स्वाश्रयहंतृतामात्रादेव प्रकृतगतमुत्कर्षमतिशा
ययेत् अतो न दोषावह इति वाच्यं । एवं हि सति महाराजं कमपि विषमविशिखविक्षे
पमात्रेणापादितवतो वराकशबरस्य वप्रकूलस्य नायकस्य न कोप्युत्कर्षः । शिवः
स्यादिति । तथा चातिशायितं प्रतिनायकावर्णनं प्रधानतिरोधानजनकतया दोषाव ३९
हमिति । अंगिनो रसाश्रयस्य रसालंबनस्य चानुसंधानमंतरांतरा विस्मृतिः ॥ तदनु

संधानाधीनाहि रसधारा तदनुसंधानमंतराविरतास्यात्प्रकृतीनां विपर्ययः यस्यप्रकृ
तौ यदुर्लनमुचितं तस्यविपर्यासेन वर्णनं प्रकृतयस्तावद्दिव्या अदिव्या दिव्यादिव्यश्च त्र
त्र दिव्यत्वममर्त्त्यैकरूपत्वं अतोनयातालियाद्यसंग्रहः उदाहरणं श्रीमन्महेश्वरादिः।
अदिव्यत्वं मर्त्त्यैकरूपत्वं यथा माधवादिः। दिव्यादिव्यत्वं उभयरूपता यथा श्रीमत्कृष्णा
दिः। त्रिविधा अप्येते चतुर्द्धाभवंति॥ धीरोदात्तधीरोद्धतधीरललितधीरशांतभेदात्
क्रमेण वीररौद्रशृंगारशांतरसप्रधानत्वमेषां लक्षणानि। श्रीरामजामदग्न्यवासुदेव
बुधाउदाहरणानि एतेषु भेदेषु प्रत्येकं उत्तममध्यमाधमभेदत्वं। अनुकूलादिभेदास्तु
ह्लिराः अनुकूलादिर्हि कदाचिद्दक्षिणः संपद्यत इति प्रकृतिभेदान्नगणनीयः एवंभि
न्नासु प्रकृतिषु रतिहासशोकाद्भुतानि अदिव्योत्तमप्रकृतिष्विव दिव्येष्वपि वर्णनीया
नि किंतु रतिः संभोगशृंगाररूपा उत्तमादिव्यविषया स्फुटिकृतसकलानुभावेन वर्णनी
या। क्रोधं प्रभो संहरसंहरेति यावद्गिरः खे मरुतां चरंति तावत्स वह्निर्भवनेत्रजन्मा भस्माव

रसवि० ३९ 39 त्रोधं मदनं च कारेत्यादि क्षुत्तृष्णादिवर्जितः सद्यः फलदः क्रोधः नाकपातालादिगमनसमु
द्रोल्लंघनदिनरात्रिविपर्ययाद्युत्साहाद्याश्चर्यकारिवस्तुवर्णनं दिव्येष्वेव विधेयं नादिव्ये
षु प्रथमे आलंबनगताराध्यत्वस्य द्वितीयानुभावगतमिथ्यात्वस्य च प्रतीतौ रसानुल्लासा
पत्तेः न च प्रथमे साधारणीकरणस्य कल्पनात् अन्यथा स्वमातृविषयकस्यापि रतिव
र्णनेपि सहृदयस्य रसोद्बोधापत्तेः जयदेवप्रभृतिभिस्तु गीतगोविंदादिप्रबंधेषु सकल
हृदयसंमतोयं समयो मदोन्मत्तमतंगजैरिव भिन्नप्रतीतस्तन्निदर्शनेनेदानीतनेन न तथा
वर्णयितुमुचितं अदिव्येषु च यावन्महत्कर्म लोकप्रसिद्धमुचितं वा तावदेवोपनिबंध
नीयं अधिकं हि निबध्यमानमसत्यप्रतिभासतया रामादिवद्वर्तितव्यं न रावणादिव
दित्याद्युपदेशे न पर्यवस्येत दिव्यादिव्येषु पुनरुभयोरप्युचितं वर्णनीयं एवं उक्तस्योचि शिवः ३९
तस्य दिव्यादीनामिव उत्तमादीनामप्यन्यथा वर्णने प्रकृतिविपर्ययः आमंत्रणोचितस
ंघनेष्वेवं तथा हि विद्यावयोवर्णाश्रमतपोभिरुत्कृष्टैः स्वतोऽपकृष्टेषु न सबहुमाने

नवचसाव्यवहर्त्तव्यंव्यवहर्त्तव्यंचाप कृषेरुत्कृष्टेषुतच्चापिभवत भगवन्नित्यादिभिः
संबोधनैः मुनिगुरुदेवताप्रभृतयएवन राजादयः जात्योत्तमैर्द्विजैरेवनाधमैः शूद्रादिभि
ःपरमेश्वरेत्यादिसंबोधनैः चक्रवर्त्तिन एवनमुनिप्रभृतयः संबोध्याः एवंयत्रजातिदे
शकालवर्णाश्रमवयोवस्थाप्रकृतिव्यवहारादिषु यत्लोकशास्त्रसिद्धमुचितंद्रव्यगुण
क्रियादितद्भेदोवर्ण्यमानः प्रकृतिभेदेपर्यवस्यतितद्यथापराक्रमोगवादीनांसिंहादी
नांचसाधकता ॥ स्वर्गादौ व्याधिजरसौ भूलोके मलसेवनं शिशिरादौ जलक्रीडाग्रीष्मा
दावग्निसेवनम् प्रतिग्रहः क्षत्रियाणांमृगयामुखजन्मनां शूद्रस्यवेदाध्ययनं तौबूर्चं
ब्रह्मचारिणां यतीनांवनितासंगो द्रव्यस्योपार्जनंतथा बालस्थविरयोः स्त्रीणांसेवावि
षयचापलं तरुणानांचवैराग्यंकुमाराणामलङ्कृता आढ्याचारोदरिद्राणांधनि
कानांदरिद्रता इत्यादिकंवर्ण्यमानंवैरस्यायैवकल्पते तच्चनौचित्यंपानकरसेसिकतापा
तावद्रसवैरस्यमावहेदित्युक्तंतदाहुः अनौचित्यादृतेनान्यद्रसभंगस्यकारणं प्रसिद्धो

रसवि० चित्स्यबंधस्तुरसस्योपनिषत्सरेति अनंगस्याभिधानं प्रकृतिरसानुपकारकस्यवर्ण
४० नंतदपिप्रकृतरसविरामहेतुत्वाद्दोषएवयथाकर्पूरमंजर्यांनियिकयास्वादनायकृ
तंयद्वसंतवर्णनं तदनाहृत्यबंदिवर्णनस्यराज्ञाप्रसंसनं इद्दृशाद्दसनेनैतदुक्तंभव
ति यदेवंविधा अन्येप्यनौचित्यहेतवो भवंति यथानायिकायादप्रहारादिनानायकको
पादिवर्णनं इत्याद्यनौचित्यंरसभंगहेतुरित्यास्तांविस्तरः॥ इतिश्रीमच्छुक्लभूदेव-
विरचितेरसविलासेरसदोषनिरूपणोनामपंचमस्तबकः॥ ॥अथकविहृद्दावा
द्वारः॥ यथानदोषःस्वपदेनोक्तावपिसंचारिणःक्वचित् ।संचारिणोनतुरसस्थायिनो
रपिक्वचिदितिपद्ये तद्विलक्षणोनानुभावः यथा औत्सुक्येनकृतत्वरासहभुवाव्यावर्त्त
मानाह्रियातैस्तैर्बंधुवधूजनस्यवचनैर्नीताभिमुख्यंपुनः॥ दृष्ट्वाग्रेवरमात्तसाध्वसरसा शिवः
गौरीनवेसंगमेसंहरोहत्पुलकाहरेणहसताश्लिष्टाशिवायास्तुवः अत्रौत्सुक्यशब्द ४०
सहसाप्रसरणादिरूपोनुभावोनौत्सुक्यमसंदिग्धंप्रतिपादयितुमीष्टे यथादिसाधार

णत्वात् अत एव दूरादुत्सुकमागते विचलितं इत्यत्र व्रीडादिभिर्विचलितत्वादिभिरनुभावै
रुपनिबध्नन्नैव रसिकशिरोमणिरमरुककविरौत्सुक्यं स्वशब्देनोपात्तवान्। अत्र नव्या
स्त्वरादीसाधारणैर्व्याउत्सुक्यादिनास्वकारणेन विशिष्यमाणास्ता एवासाधारणपमास्योद्बो
त्सुक्यादिमंजयंतीत्यास्वादोदयः ननु शब्दादेवतत्प्रतिपत्त्याव्यभिचार्यादीनां वाच्यत्वास
हनस्यानुत्पादनात्। अत एवात्र नैवयत्थेमपि विशेषणत्वेनोपयोगात् दूरादुत्सुकेऽ
स्मादौ शब्दमहिम्ना विशिष्टस्यैवानुभावस्य कल्पनमिति तत्तेऽभिव्यक्तिरिति। एवं व्य
वस्थितिशब्देनोपादानं विनानतदनुभावस्यासाधारण्यं न च तेन विनाभिव्यक्तिः। न चाभि
व्यक्तिं विनास्वादसंभवः। न च तेन विनाभावमप्रवेशः। न च तमंतरेण तथाकीर्तनं यु
क्तमिति भावस्योकीर्तनमप्येतादृशस्य व्यभिचारिणः शब्दवाच्यतायादोषत्वाभावं सा
धयतीति युक्तं उत्सवप्यामः। संचार्यादिर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा यदा प्रकृतरस
विरुद्धव्यभिचार्यादिर्बाध्यत्वेनोच्यते तदा न दोषत्वं प्रत्युत प्रकृतस्य पोषकतया गुण

रसवि॰ त्वं अत्र व्यभिचारिणो यथा क्वाकार्यं शशलक्ष्मणः क्वच कुलं इत्यादौ अत्र चतुर्षु पादेषु पूर्व-
४१ भागप्रतिपाद्यानां शामांगानां वितर्कमतिशंकाधृतीनां उत्तरभागप्रतिपाद्याभिरभिलाषांग-
भूताभिरौत्सुक्यस्मृतिदैन्यचिंताभिस्तिरस्कारपुरःसरं चिंतायामेव पर्यवसानं इति भावशा-
बलता परिपोषकत्वाद्गुणत्वं विभावस्य यथा सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः किं-
तु मत्तांगनापांगभंगलोलं हि जीवितं अत्र सत्वर्द्धे शृंगारस्य परार्द्धे शांतस्य विभावः अनयो-
र्विरोधेपि पूर्वस्य बाध्यत्वेनोक्तत्वान्न दोषः प्रस्तुतशांतपरिपोषाद्गुणत्वं एवं यत्र प्रतीयात्त-
सर्वा रामादयः सत्येव जीविते तन्नोपकार्यं उपादेयाः जीवितं चातिभंगुरमिति किं कृत्तं उपादे-
यत्वं अतो रम्यत्वेपि निःफला एते इति एतेषां पूर्वोक्तरसानां परस्परं कैः सह विरोधः तत्र वी-
रशृंगारयोः शृंगारहास्ययोः वीराद्भुतयोः वीररौद्रयोः शृंगाराद्भुतयोश्चाविरोधः शृंगारबी- शिवः
भत्सयोः शृंगारकरुणयोर्वीरभयानकयोः शांतरौद्रयोः शांतशृंगारयोश्च विरोधः। तत्र क- ४१
विना प्रकृतरसपरिपोषकामेन तद्विरुद्धरसांगानां निबंधनं न कार्यं।

तथाहि सति तदभिव्यक्तौ विरुद्धः प्रकृतं बाधते सुंदोपसुंदन्यायेन सहत्वेति पक्षन्यायेन वा उ
भयोर्हतिर्निर्बलता वा स्यात् यदि तु विरुद्धयोरप्येकत्र समावेशः स्यात्तदा विरोधं परिहृत्य
विधेयः॥ तथाहि। विरोधस्तावद्द्विविधः। सामानाधिकरण्येन नैरंतर्येण वा। स चोभयरूपः
स्थलविशेषेणेति मनसि कृत्वेत्याह आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः। रसांतरेणां
तरितो नैरंतर्येण तु यो रसः॥ यो रस इत्यत्र विरुद्ध इत्यनुषज्यते तत्र रसनामाद्यो विरोधः तदधिक
रणावृत्तित्वरूप वीरभयानकयोरैकाधिकरण्ये स च भयस्य भिन्नाधिकरणप्रतिपक्षगतत्वे
न निवर्तते दोषत्वं परिहृत्य वीररसपोषकत्वे गुणत्वे च पर्यवस्यति यथोदाहरणं मम यत्कृ
ष्टाश्रुततिरेव संगरे श्रोणितं पिबति विद्विषां मुखात् रक्तिमानमुपयाति सा यदा तद्गुणं भव
ति पांडुरं हि तत् अत्र नायके उत्साहस्य शत्रुषु भयस्य च वर्णनान्न विरोधः रसपदेना
त्र प्रकरणे तदुपाधिः स्थायिभावो गृह्यते रसस्य सामाजिकगतत्वेन नायकाद्यवृत्तित्वा
त् अद्वितीयानंदमयत्वेन विरोधासंभवाच्च नैरंतर्येण विरोधश्च तत्तज्ज्ञानप्रतिबंधकता

रसवि॰ नकत्वरूपः सचरसांतरस्याविरोधी तेनसंधिकर्त्तुरिवांतरस्थापनेनिवर्त्तते यथा भूरेणुदि
४२ ग्धान्नवपारिजातमालारजोवासितबाहुमध्याः गाढंशिवाभिः परिरभ्यमाणान्सुरांगना
श्लिष्टभुजांतरालाः सशोणितैः क्रव्यभुजांस्फुरद्भिः पक्षैर्खगानामुपवीज्यमानान् संवीजिता
श्चंदनवारिसेकैः सुगंधिभिः कल्पलतादुकूलैः। विमानपर्यंकतलेनिषण्णाः कुतूहलाविष्टत
यातदानीं निर्दिश्यमानान्ललनांगुलीभिर्वीराः स्वदेहान्पतितानपश्यन् अत्रबीभत्सस्सा
मग्रीवशात्पूर्वंबीभत्सचर्वणाततः तत्सामाग्र्याक्षिप्तनिः स्वकप्राणत्यागादिरूपसामग्री
वशाद्वीरचर्वणाततः शृंगारचर्वणेतिनविरोधः नैरंतर्याभावात् इत्थंच उदासीनचर्वणेन
प्रतिबंधकज्ञाननिवृत्तौनिःप्रत्यूहः प्रतिबंध्यचर्वणोदयइतिफलितार्थः अविरोधप्रका
रांतरमपि यथा स्मर्यमाणोऽविरुद्धोपि यः साम्येनाथविवक्षितः अंगिन्यंगत्वमापन्नौ तौनदु शिवः
ष्टौपरस्परं तत्रस्मर्यमाणेनाऽविरोधोयथा अयंसरशनोत्कर्षीपीनस्तनविमर्द्दनः ना ४२
भ्यूरुजघनस्पर्शीनीवीविस्रंसनकरः समरभुविपतितंभूरिश्रवसोभुजमालोक्यतद्वधूव

चनमिदं तथा च शृंगारांगमपि पूर्वावस्थास्मर्यमाणतयोद्दीपनविभावत्वेन करुणपरिपोषि
केऽस दोषः साम्यविवक्षया यथा राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी गंधव
द्रुधिरचंदनोक्षिता जीवितेशवसतिं जगाम सा अत्र शृंगारबीभत्सयोर्विरोधेऽपि शृंगारउ
पमानं बीभत्सश्चार्थ्यमेयः एवं ह्यत्र प्रतीयते यथा कापि जीवितेशस्य कांतस्य वसतिं प्रयाति
तथा सा मृत्युसदनं जगामेति न विरोधः एकत्रांगिनि द्वयोर्विरुद्धयोरंगत्वं द्विधा तुल्यकक्ष
तयांगांगिभावेन साक्षात्परस्यांगत्वाभावमासाद्य वा तत्राद्ये नाविरोधः यथा क्रामंत्यः
क्षतकोमलांगुलिगलद्रक्तैः सदर्भाः स्थलीः पादैः पातितयावकैरिव गलद्बाष्पांबुधौतान
नाः भीता भर्तृकरावलंबितकरास्त्वद्वैरिनार्योऽधुना दावाग्निं परितो भ्रमंति पुनरप्युद्यद्विवाहा
इव अत्र राजविषया कविरतिः प्रधानं तत्र करुणशृंगारावुभावपि साक्षादंगमिति तन्निर्वा
हणैकव्याकुलयोस्तयोरेककार्योद्यतयोरिव भटयोः सहजतो विरोधेऽपि न दोषाय प्रता
पे द्वयोरपि साक्षादेवांगत्वेन तादृशोपं प्रभावो येनासां पुनर्विवाह उत्प्रेक्ष्यते इति प्रतापाति

रसवि॰ श्रायेपर्यवसानात्। अंगांगिभावेनापरांगतया। विरोधे यथा क्षिप्तोहस्तावलग्नः प्रसभमभि
४३ हतोप्याददानोंऽशुकांतं गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण आलिंगन्योव
धूतस्त्रिपुरयुवतिभिः। साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः
४३ शराग्निः। अत्र शिवशराग्निप्रभावातिशयस्य करुणेंगितस्य तु शृंगारः एवमेवलतत्त्वविभा
वनीयं भावनापरिपक्वबुद्धिभिरित्यलं बहुभाषणेन॥ ॥इति श्रीमच्छुक्लभूदेवविरचिते
रसविलासे दोषोद्धारो नाम षष्ठः स्तबकः॥६॥ ॥श्रीसरस्वत्यै नमः॥ ॥एवं निरूपितः
सपरिकरो रसस्वरूपः काव्यस्यात्मा इदानीं शरीरभूतस्य काव्यपदप्रतिपाद्यत्वरूपलक्ष्यताव
च्छेदकाक्रांतस्य तस्य लक्षणमुच्यते। तत्र काव्यप्रकाशे। तददोषौ शब्दार्थौ सगुणावनलं
कृती पुनः क्वापि इति। निर्दोषत्वादिविशेषविशिष्टौ शब्दार्थौ काव्यपदवाच्यौ गुणस्य रस शिवः
धर्मत्वेपि गुणपदं व्यंजकवर्णपरम् अनलंकृतीत्यत्रानुदाहरणे। तेन नञः स्वार्थत्वं ४३
अल्पत्वं वा अस्फुटत्वं एवं च सर्वत्र सालंकारौ शब्दार्थौ काव्यं क्वचित्स्फुटालंकारविरहेपि

नकाव्यत्वहानिः नीरसेप्यस्फुटालंकारे काव्यत्वमेव। दोषाभाववत्त्वावच्छेदकः तदाह दंडी
तदल्पमपि नोपेक्ष्यं काव्यं दुष्टं कथंचन स्याद्वपुः सुंदरमपि श्वित्रेणैकेन दुर्भगमिति प्रदीप
कृतस्तु नीरसे स्फुटालंकारविरहिणि न काव्यत्वं यतो रसादिरलंकारश्च द्वयं चमत्कारहेतुः
तथा च यत्र रसादीनां अवस्थानं न च तत्र स्फुटालंकारापेक्षा नीरसे तु यदि न स्फुटोलंकारः
किं कृतश्चमत्कारः स्यात् चमत्कारसारं च काव्यं तथा च स्फुटालंकाररसान्यतरवत्त्वं काव्य
त्वमिति लक्षणं रसवत्स्वनलंकारे काव्यत्वं दृष्टमित्याहुः नव्यास्तु रसदोषाभावयोरन्यतर
त् विशेषणं दोषाभावमात्रविशेषणत्वे काव्यपदं छिद्रविषयं निर्विषयं वा स्यात् यावद्
दोषोत्सारणस्य दुःसाध्यत्वात् तथा दुष्टेपि रसान्वये काव्यत्वमेव परं त्वपकर्षः तदुक्तं॥
कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वभिमता यत्र रसस्यानुगमः स्फुट इति
किंच दुष्टस्याकाव्यत्वे काव्यं दुष्टमिति व्यवहारो न स्यात्। तदूस्याहुः साहसिकास्तु रमणीया
र्थप्रतिपादकः शब्दः काव्यं न तु भव्यं काव्यं पठ्यते श्रूयते काव्यार्थो ज्ञायते काव्यं श्रुतम

रसगं०
४५
र्थो न ज्ञात इति विश्वजनीनव्यवहारात् किंच वेदेऽपि शब्दार्थद्वयस्यैव त्वदुक्तरीत्या वेदत्वं
स्यात् न चेष्टापत्तिः। कपिलादुग्धपानेन ब्राह्मणीगमनेन च वेदाक्षरविचारेण शूद्रश्चांडा
५५ लतां व्रजेत् न तस्मात् शृणुयाच्छूद्रो ज्ञात्वा वेदं कथंचन तदर्थं च पुराणेषु शृणुयान्मुनिभिः
स्मृतं इत्यनेन शब्दमात्रश्रवणस्यैव निषेधात् वेदत्वं शब्दमात्रधर्म एवेति सिद्धांतात् र
मणीयत्वं च लोकोत्तरचमत्कारजनकज्ञानविषयत्वं चमत्कारत्वं च सुखनिष्ठो जातिविशेष
: किंच काव्यत्वं द्वयोः पर्याप्तं प्रत्येकं वा नाद्यः एको न द्वाविति वत् शब्दे न काव्यमिति व्यवहारा
पत्तेः नांत्यः एकस्मिन्नपि पद्ये काव्यधर्मत्वमिति व्यवहारस्य प्रसंगादिति प्राहुः अयरसः
काव्यात्मकया व्यंग्यया प्रतीयते इत्याकांक्षायां न तावदभिधालक्षणाभावमपि तु व्यंजनामात्रे
णेति प्रतिपादयितुं क्रमेणाभिधालक्षणाव्यंजना निरूप्यंते तत्र शक्याप्रतिपादकत्वम । शिवः
भिधाशक्तिश्चास्माच्छब्दादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छा समयसंकेतपदाभिधेया ४४
। सा च विशेषात् तयाऽर्थे विशेषणतया शब्दे च अयं शब्द एनमर्थं बोधयत्विति ईश्वरेच्छा

कर्शो यदि तदा विशेष्यतया भ्रान्त्यं विशेषणतया चार्थे वर्तमानान्शाब्दार्थयोः संबंधः तार्कि
कमते चाभिधापदेन शक्तिरेवाभिधीयते आलंकारिकमते परमयं विशेषो यत्र एतादृश
शक्तिसहकारेणार्थप्रतिपादकत्वं शाब्दनिष्ठमभिधापदेनाभिधीयते सा चाभिधा त्रिधा
रूढिर्योगो योगरूढिश्च अवयवशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढिः तन्मात्रेण प्रति
पादकत्वमवयवार्थप्रतिभासात् यथा गोघटादिपदे अवयवशक्तिमात्रसापेक्षं पद
स्यैकार्थप्रतिपादकत्वं योगः तन्मात्रसापेक्षता च समुदायार्थप्रतिभासात् यथा पाचक
पावकादिपदे अवयवसमुदायोभयशक्तिसापेक्षं पदस्यैकार्थप्रतिपादकत्वं योगरूढिः
यथा पंकजसरोजजलजादिपदं अत्रावयवशक्तिमपेक्ष्य पंकजनिकर्तृत्वेनोपाधिना
समुदायशक्तिमपेक्ष्य पद्मत्वेन जात्या च पंकजपदेन कमलरूप एकार्थः प्रतिपाद्यत
इति योगरूढिः अत्र पंकजनिकर्तृपद्मः इति बोधस्याकारः क्वचिद्योगरूढिमतः पदस्य
विषयविशेषे ऽवयवार्थानन्वयात्समुदायशक्तिमात्रे विश्रान्तिः यथा ऽऽतपुष्करस्थल

रसवि० नलिन्या वनादस्मादुद्भूतः सरसिजसंभवः परागः भास्याभिर्विपतितिविवर्त्तितः समंता
४५ दाधत्ते कनकमयातपत्रलक्ष्मी अत्र स्थलनलिने सरोऽधिकरणावच्छिन्नजनिकर्तृत्वस्य
बाधात् रूढिमात्रे विश्रांतिः यत्र समुदायार्थानन्वयस्तत्र योगमात्रे विश्रांतिः॥ यथा कल्हा
रवैरवमुखेष्वपि पंकजेषु लोकेशायत्वमत्नमेव तथा प्रसिद्धं मन्येभिजालभवदास्यतुलास्य
नेति मम प्रकाशनमिदं विधिनैव क्लृप्तं। अत्र पंकजपदस्यैकैवरवकह्लारादिषु समुदाया
र्थानन्वयाद्योगमात्रे इयं चाभिधानेकार्थानां क्वचित्स्थले संयोगाद्यैर्नियम्यते एकार्थमा
त्रोपस्थितिस्तत्कृत्यं क्रियते तद्रूति यावत् यदाहुः संयोगो विप्रयोगश्च साहचर्यं विरोधिता
अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य सन्निधिः सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादय
ः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवइति संयोगः प्रसिद्धार्थस्य गुणविशेषरूपः संबं शिवः
धः तेनाभिधानियमनं यथा सशंखचक्रो हरिरित्यत्र शंखादिसंयोगेनानेकार्थस्य हरि ४५
शब्दस्याच्युतोभिधानियम्यते अन्यहरिपदार्थे तत्संयोगाभावात् विप्रयोगः तादृश

संबंधध्वंसः तेन यथा अशंखचक्रो हरिरित्यत्र ध्वंसस्य प्रतियोगिपूर्वकत्वात् साहचर्यं स
हचरता तेन यथा रामलक्ष्मणौ इत्यत्र रामपदस्य लक्ष्मणसाहचर्येण दाशरथौ विरोधः स
हानवस्थानं वध्यघातकभावश्च तेन यथा छायातपौ इत्यत्र कांत्यादौ शक्तत्वेपि छायाप
दस्य तथाभावे विरोधिनोः रूपयोश्छिन्नत्वोपमायां रामार्जुनपदयोर्भार्गवकार्त्तवीर्ययोः
अर्थः प्रयोजनं तेन यथा स्थाणुं भज भवच्छिदे इत्यत्र भवच्छेदरूपप्रयोजनवशात् स्थाणु
शब्दस्य महेशे प्रकरणं च वक्तृश्रोतृबुद्धिस्थता तेन यथा सर्वं जानाति देव इत्यत्र देवशब्दस्य रा
जनि। लिंगं संयोगातिरिक्तसंबंधेन परपक्षव्यावृत्तो धर्मः तेन यथा कुपितो मकरध्वज इ
त्यत्र मकराकारध्वजसमुद्राभ्यां व्यावृत्तेन समवायसंबंधवता कोपेन मकरध्वजशब्दस्य
कामे यत्तु लिंगं चिह्नमिति तन्न कोपस्य कामचिह्नत्वाभावात्। असाधारणधर्मस्य चि
ह्नत्वात् सशंखचक्र इत्यत्रातिव्याप्तिप्रसंगाच्च शब्दस्यान्यस्य संनिधिः नियतार्थक
शब्दांतरसामानाधिकरण्यं तेन यथा देवस्य त्रिपुरारातेरित्यत्र उक्तपदशब्दसमानविभक्ति

कत्ववशाद्देवशब्दस्यशंभुरूपेऽमरे अन्यदेवशब्दार्थस्याराः त्रिपुरारातित्वाभावात्
सामानाधिकरण्येपादानामभवच्छिदे इत्यत्रातिव्याप्तिः नचवसशंखचक्रोहरिरित्यत्रा
तिव्याप्तिः तत्रसशंखचक्रपदस्यसामानाधिकरण्येपिनशंखचक्रपदसामानाधिक
रण्यं यदुदाहरणेशंखचक्रेइतिसंयोगोदाहरणेतात्पर्यंसामर्थ्यं कारणत्वंतेनयथा मधु
नामत्तः कोकिलरसत्रमधुशब्दस्यवसंते अन्यस्यमधुशब्दार्थस्यकोकिलमादनासाम
र्थ्यात् । औचितीअर्हतातथायथा पातुवोदयितामुखंइत्यत्रउत्कंठितमनोरथसाधनौ
चित्येनसुखशब्दस्यसांमुख्येनतुवदनादौ । यद्यप्यत्रापिसामर्थ्यंसंभवत्येवतथापिमधु
नेत्यत्रतृतीयाकारणत्वार्थकतयातद्बोधिकानतु प्रकृतेपितथात्वौचित्यज्ञानमात्रादे
वशान्तिनियमनंसंकीर्णमिति देशोनयथाभात्यत्रपरमेश्वरइति अत्रेतिराजधानीरूपा शिवः
द्देशात् । परमेश्वरपदस्यराजनिकाशेनयथा चित्रभानुर्विभातीत्यत्रचित्रभानुशब्दस ४६
दिवासूर्ये रात्रौवह्नौव्यक्तिर्लिंगंपुंस्त्वादितयायथामित्रंभातीति अत्रनपुंसकरूपा

ल्लिंगात्मित्रपदस्य सुहृदि मित्रो भातीत्यत्र पुंल्लिंगात्सूर्ये स्वरेण यथा सुधाकरसुहृ
च्छत्रं दृष्टिः पंकजवैरिणीत्यत्र पंकजस्य वैरिणीति षष्ठीतत्पुरुषव्युत्पत्तिर्यद्यंतोदात्तता
तदा षष्ठीतत्पुरुषव्युत्पत्तौ च पंकजस्य वध्यत्वं दृष्टेश्च घातकत्वं लभ्यते अंतोदात्तत्वे
तु पंकजं वैरि यस्या इति बहुव्रीहिलाभात् दृष्टेर्जेयत्वं पंकजस्य जेतृत्वं च लभ्यते तथा
चोदात्तादिः स्वरोऽभिधानियामकः स्वरादय इत्यादि ग्रहणादभिनयापदेशौ गृह्येते अ
भिनयश्च साक्षादेवार्थाकारादिप्रदर्शिका चेष्टा। हस्तादिक्रियेति यावत् तया यथा पु
रारिसंदर्शितसन्निवेशौ मत्सराभूतसरोजकोशौ इमावियं तौ पुनरेत्य मास्ते कुचौ कि
यंतौ परतो भवेतां इत्यत्र तत्कालस्तनपरिमाणप्रदर्शकहस्तव्यापारेण इयत्तदस्य प
रिमाणविशेषे अपदेशोऽभिमतनिर्देशः स च हृदये हस्तनिक्षेपादिरूपः तेन यथा दू
तः श्रीदैत्यः प्राह श्रीर्नेत एवार्हति क्षयं इत्यत्र इत इति स्वात्मनिर्देशेन तस्य वक्तृविष
रमात्मन्यभिधानियम्यते यत्र वचनानां शक्तिमतः शब्दस्याभिधानियामकमनेकत्रा

रसवि॰ र्थेप्रविष्टं नत्रान्यतरस्मिन्नाभिधास्यिमते यथा येन ध्वस्तमनोभवेन बलिजित्कायः पुरा
४१ स्त्रीकृतो यश्चोद्वृत्तभुजंगहारवलयो गंगां च यो धारयत्। यस्याहुः शशिमच्छिरो हर इति
स्तुसंचनानामराः पायात्सः स्वयमंधकक्षयकरस्त्वां सर्वदो माधवः अत्र शिवकेशव
योर्द्वयोरपि स्तुत्यतया प्रकरणमविशिष्टं अतो ध्वस्तमनोभवेन नाशितमन्मथेन येन
बलिजित्कायो विष्णुदेहः पुरेषु अस्त्रतां नीतः यश्चोद्वृत्तशेषवासुकिप्रभृतिनागसंपा
दितहारवलयः कृतः। यश्च गंगामधारयत्। यस्य शिरः शशिमदाहुः अमराः स्तुसंचना
म हर इत्याहुः अंधकासुरक्षयकरः स उमाधवः त्वां सर्वदा पापादिभ्य अभवेन निःसंसा
रेण येन अनः शाकटं ध्वस्तं येन च बलिजित् त्वस्य कायः पुरामृतमथनावसरे स्त्रीत्वं नी
तः यश्चोद्वृत्तं भुजंगं कालियं हतवान्॥ खे शब्दब्रह्मणि लयः भावरूप्यापत्तिरस्येति ख शिवः
लयः उद्धृत्तभुजंगाद्भृतवदरवलयं चक्रमस्यैकं पदं वा अगंगो वर्द्धनं गां वराहाव ४१
तारो भूमिं च यो धारयत् यस्य स्तुत्यं नाम शशिमच्छिरो हर इत्याहुः शशिनं मथ्नातीति यो

राकुः तच्छिरोहरइति अंधकान्दोराज्ञांक्षयकरोनिवासकृत्सर्वदोमाधवः त्वांपायादि
त्यर्थद्वयेप्यभिधैवव्यापारः अतएवाश्लेषोऽलंकारः ननुयत्रानेकत्रप्रकरणाद्यविशि
ष्टंतत्रभवत्वनेकत्राप्यभिधाव्यापारः।यत्रप्रकरणस्यकुत्रचिदर्थेव्यवस्थितत्वेपि अ
प्राकरणिकस्यार्थांतरंप्रतीयतेतत्रकागतिः यथा भद्रात्मनोदुरधिरोहतनोर्विशाल
वंशोन्नतेः कृताशिलीमुखसंग्रहस्य यस्यानुपप्लुतगतेःपरवारणस्यदानांबुसेक
सुभगः सततंकरोभूत् अत्रप्रकरणेनभद्रात्मनइत्यादिपदानांराजन्यन्वययोग्येचार्थे
प्रकरणेनाभिधानियमनेपि अप्राकरणिकोगजः।तदन्वयीचार्थः प्रतीयतेअत्राकुः
तत्रशब्दशक्तिमूलोंजनव्यापारएवशरणंगत्यंतराभावात् नचतत्राप्यभिसंभव
तिप्रकरणेनरानितस्यानियमनात् नापिलक्षणामुख्यार्थबाधाभावात् तदेतदाकुः
काव्यप्रकाशकृतः अनेकार्थस्यशब्दस्यवाचकत्वेनियंत्रिते संयोगाद्यैरवाच्यार्थधीकृ
द्व्यापृतिरंजनं अंजनंव्यंजनं तस्मात्संयोगादिभिरभिधायांसंखलितायत्रकुंतमामेति।

रसवि॰ अर्थांतराऽवगमनेव्यंजनमेवक्षमं तत्रेति फलितार्थः अथ लक्षणा निरूप्यते॥ ॥
४८ ॥ साक्षाच्छक्यसंबंध इति तार्किकाः। शक्यसंबंधेनान्यार्थप्रतिपादकत्वं शक्यनिष्ठं
48 लक्षणेत्यालंकारिकाः। तत्सादृश्यप्रतिपादकत्वरूपा गौण्यपि लक्षणाप्रभेद एव तत्सा
दृश्यस्यापि तन्निरूपितसादृश्याधिकरणत्वरूपपरंपरासंबंधसत्वात् नहि साक्षात्सं
बंधे विशिष्टबुद्धियोग्यसंबंधे वा सत्येव लक्षणेति नियमः चक्षुरादेर्घटेनेत्यादिषु
संयुक्तसमवायादिवद्विशिष्टबुद्ध्ययोग्यस्यापरंपरासंबंधस्यापि प्रत्यासत्तित्वो
पगमात् व्यतिरेकलक्षणास्थलेपि तन्निरूपितविरोधाधिकरणत्वादिपरंपरासं
बंधेन तादृश्येन लक्षणाक्लृप्तेश्च एतेन सादृश्यं न संबंध इति गौणी लक्षणातोऽ
न्या। विशिष्टधीयोग्यस्यैव संबंधत्वात् संयोगसति दंडी देवदत्त इतिवत्सत्यपि शिवः
तादृश्ये सिंहवान् देवदत्त इति विशिष्टबुद्धेरदर्शनादिति तस्मात्सादृश्यगर्भतदस ४८
संबंधनिमित्ततया गौणी शुद्धा चेति लक्षणा द्विविधा॥ इयं च द्विविधा लक्षणा प्रसे

केद्विविधा रूढिलक्षणा फललक्षणा च रूढिस्तु प्रसिद्धतया निरूढा निरूढलक्षणा विव
क्षितार्थान्तरद्योतनफला फललक्षणा आद्या यथा नांजसा निगदितं विभक्तिर्नि
क्ति मिश्र्च निखिलाभिरागमे तत्र कर्मसु विपर्ययलीनमन्त्रमूहकुशलाः प्रयोगिण
इत्यत्र कुशादानकर्तरि कुशलशब्दस्य मुख्यः प्रयोगः तस्य च प्रकृते बाधात् वि
वेकत्वसादृश्येन चतुरे लक्षणा निरूढा मुख्यार्थबाधः तद्योगसंबंधश्च सर्वत्र लक्ष
णाबीजं द्वितीयोदाहरणं श्रुत्वा यथा कलाङ्कुरे फालविलिनीलकंकणं प्रसार्य शुण
खाभुजमत्र वल्लरीकृता पयःकलंकं व कूजितैरनामयं पृच्छति दक्षिणानिलं अ
त्र द्विरेफशब्दस्य द्वौ रेफौ यस्येति भ्रमरशब्दवृत्तेः तद्वाच्ये निरूढलक्ष
णा इयमेव लक्षितलक्षणेत्युच्यते एवं लगादिशब्दानां लगिंद्रियादिष्वपि श्रुरू
रूढिलक्षणा द्रष्टव्या जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा सारोपा साध्य
वसाना च गौणी शुद्धा चेत्येवं सप्तविधा फललक्षणा जहल्लक्षणा यथा जटिलावल्क

रस॰ ४२ न्धराः स्रोतस्विन्यां सुपर्वणां यं वदान्यतया जेतुं तपस्यंति सुरद्रुमाः अत्र स्रोतस्वि
नीपरस्य सुरद्रुमाधिकरणयोगे तत्तीरे लक्षणा मुख्यार्थस्य तदधिकरणत्वेना
न्वयाभावात् अजहल्लक्षणा सुरद्रुमाणां तपस्योपस्कारकं तीरस्यातिशायितपावनत्व
द्योतनं फलं एवं गंगायां घोष इति प्रसिद्धोदाहरणमप्यनुसंधेयं तत्र गोस्वामिनः प्री
तये तीरस्यातिशायितत्वं तस्य द्योतनं फलं अतिरस्कृतलक्षणापि लक्षणाप्रभेदा एव य
था उपकृतं बहु नाम किं उच्यते सुजनता भवता प्रथिता भृशं विदधदीदृशमेव सखे स
दा सुखितमास्व ततः शरदां शतं अत्रापकारिणं प्रत्युपायोपि उपकृतादिपदैः स्वार्थ
विरुद्धं लक्ष्यते त्वयापकारे क्रियमाणेपि मय्येवं प्रियमेवोच्यत इति स्वस्य साधुत्वद्यो
तनं फलं अजहल्लक्षणा कुंताः प्रविशंति यष्टयः प्रविशंतीति भीतिपलायमाने शिवः
वाक्ये कुंतादिपदस्य तद्युक्तपुरुषेषु लक्षणा कुंतादेरपि पुरुषसहितस्येन प्रवेशाति ४२
यान्वयात् अजहल्लक्षणा तेषां निर्दयप्रहर्तृत्वादि द्योतनं फलं। ग्रामे करेणुर्दृ

ह्लादो सलिलग्रामोऽब्धः पुष्पितं वनं इत्यादिप्रयोगे ग्रामादिपदस्य स्वार्थैकदेशापरित्यागेन
तदेकदेशान्तरे जहदजहल्लक्षणारण्यभूयस्त्वादिद्योतनं फलं सारोपा यथा केशाधिका
राद्यथ तद्रूपभालस्थलार्द्धचन्द्रास्फुटमष्टमीयं एनां पदासाद्य जगज्जये पीयं मनोभुवा
सिद्धिरसाधि साधुना अत्रार्द्धचन्द्रार्द्धाधिकारत्वेन रूपितभालस्थलके केशाधिकरणत्व
सादृश्यात् गौणसारोपा उपमितसारोपविषयदमयन्तीवाचकपदस्याष्टमीति आरोप्य
माणाष्टमीवाचकपदस्योभयस्य पृथगुपादानादारोपः ताद्रूप्यप्रतीतिफलं मदनज
गज्जयसिद्धौ इतरवैलक्षण्यं एवं च फलं एवं गौर्वाहिकः मुखं कमलं इत्यादौ समासेऽपि सा
रोपलक्षणा इष्टव्या गौणसाध्यवसानलक्षणा यथा वापीकापि स्फुरति गगने तत्प
रं सूक्ष्मपद्यासोपानालीमधिगतवती काञ्चनीमैन्द्रनीली अग्रे शैलौ सुकृतिसुल
भौ चन्दनच्छन्नदेशौ तत्र स्नानं सुलभममृतं संनिधास्सुधांशोः अत्र वाप्यादिपदानां
गंभीरत्वादिसादृश्यात् गौणसाध्यवसायलक्षणा सर्वथैवाभेदप्रतिपत्तिः फलं वि

रसवि० षयस्यविषयिणेदानपह्नवेनतद्रूपोपस्कृतताप्रतीतिस्ताद्रूप्यप्रतीतिः विषयस्यविषयिणे
५० वाभेदप्रतीतिः सर्वथैवाभेदप्रतिपत्तिरितिसारोपसाध्यवसायलक्षणेः फलभेदः
50 विषयविषयिवाचकयोर्द्वयोरपिनिर्देशे आरोपः विषयिपदमात्रस्यविषयस्याऽ
निकृततयानिर्देशोऽध्यवसायइत्सारोपाध्यवसानयोर्भेदः ननुसारोपलक्षणोदाहरणेमु
खेंदुरित्यादाविंद्वादिपदस्यमुखादौनमुखत्वादिनालक्षणामुखादिपदस्यापिसत्वेनयोनरू
त्सापत्तेः नापींदुगतलावण्यादिगुणेन अन्यगुणस्यान्यत्रप्रवृत्तिनिमित्तत्वायोगात्तेना
पिमुखगतलावण्यादिगुणेनतन्मुख्यार्थसंबंधरहितगुणमुखेनलक्षणायोगात् मैवं
मुखचंद्रेऽन्वयानुगतलावण्यसामान्यमुखेनलक्षणोपगमेदोषाभावात् शुद्धसारो
पा अमात्योऽयंराजा इत्यादौ अनुल्लंघ्यशासनत्वादिद्योतनंफलं एवं अमात्यपरस्तु शिवः
पादानेराजेत्यत्रशुद्धसाध्यवसाना। निग्रहानुग्रहसामर्थ्यद्योतनंफलं एवं अयमह ५०
स्तइत्यादयः प्रयोगाः तत्रसंबंधभेदादवसेयाः। एवंशुद्धापंचविधागौणीषड्विधेति

सप्तविधा फललक्षणा॥ अथ व्यंजना निरूप्यते॥ ॥तत्र रसस्तावद्वाच्याद्व्यतीय
तीयत इति सकलसहृदयानुभवसिद्धं अतस्तत्र वृत्तिरंगीकार्या कृत्स्नस्यैव शाब्दस्य प्रत्याय
कत्वात् अन्यथाऽतिप्रसंगात्। तत्र न तावद्रसादिबोधनेऽभिधा व्याप्रियते। तत्र संकेता
भावात्। किंच विभावादिवाचकपदानां विभावादिमात्रशक्तत्वात्। पदांतरस्य चाभा
वात् केन रसाद्यभिधानं स्यात्। नहि विभावाद्यभिधानमेव तदभिधानं रसस्य तदे
करूपानभ्युपगमात् प्रत्युत स्वपदाभिधाने रसदोषांगीकार इति। यत्रापि शृंगार
स्यायमनन्तमधुना राज्यमेकातपत्रमित्यादौ शृंगारादिपदोपादानं तत्रापि विभावादि
भ्य एवास्वादरूपा रसप्रतीतिर्न तु रसशृंगारादिपदादिति तेनाप्यभिधानत्वं का। घ
टकर्मत्वानयनकृतयः पदार्थाः एतेषां च परस्परं संसर्गस्तात्पर्यमर्यादया वाकाङ्क्षा
सत्तइत्यभिहितान्वयवादिनां तार्किकाणां मतेपि तात्पर्याख्या वृत्तिः संसर्गमात्रो
पक्षीणा न व्यंग्यप्रत्यायने व्यापारमपसायति। केचित्तु सोऽयमिषोरिव दीर्घदीर्घो व्या

रसवि॰ पारः यथा बलवताप्रेरितइषुश्चर्मछेदमुरोभेदं प्राणहरणं च करोति तथा एकाभिधार
५१ व्यापारसिद्धिरिति तन्न। शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्। किं चैवं लक्षणा
पि नांगीकार्या स्यात् दीर्घदीर्घाभिधाव्यापारेणैव तीरादिप्रतीतिसिद्धेः। अपि च ब्रा
ह्मण पुत्रस्ते जातः कन्या ते गर्भिणीत्यादौ मुखप्रसादमुखमालिन्याभ्यां हर्षशोकयोर
नुमानमिति सर्वसिद्धांतः तत्रापि हर्षशोकयोरभिधैव व्यापारः स्यात् दीर्घदीर्घाभि
धाव्यापारस्य तावदपि प्रसारसंभवात्। यत्तु दात्परः शब्दः स शब्दार्थ इति न्यायादसः
शब्दार्थ इति तत्रोच्यते किमिदं तत्परत्वं तदर्थकत्वं वा तात्पर्यार्थं स्यात् तद्बोधकं वा। आद्ये न
विवादः। व्याप्यत्वेऽपि तदर्थतानपायात् द्वितीये तु केयं तात्पर्याख्यावृत्तिः अभिहितान्व
यवादिभिरंगीकृता तदभावा आद्ये रत्नमेवोत्तरं द्वितीये तु अतिरिक्तवृत्तिमात्रे विवा शिवः
दः न तु अतिरिक्तवृत्तौ। किं च नैयायिकनयेऽभिधायाः शब्दार्थो नियमनिष्ठा। आलंकारि ५१
कमते च शब्दमात्रनिष्ठा व्यंजना तु क्वचित्केवलमर्थमात्रे इति कथं शब्दव्यापारेण

ऽभिधेयान्यथासिद्ध्या। अर्थनिष्ठाद्योतकाव्यप्रकाशाकारैः। वक्तृबोद्धव्यकाकूनां वाक्य
वाच्यान्यसन्निधेः प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषां। योऽर्थस्यान्यार्थधीहेतुर्व्या
पारो व्यक्तिरेव सेति। बोद्धव्यः प्रतिपादनीयो जनः अतो न वाच्यो न सहाभेदः। काकुः शो
कभीत्यादिनिर्ध्वनिर्विकारः। वाक्यवाच्याभ्यां सहितोऽन्यसन्निधिः। वाक्यवाच्यान्यस
न्निधिः प्रस्तावः प्रकरणं वैशिष्ट्यं वैलक्षण्यं तच्च वक्त्रादिषु प्रत्येकमभिसंबध्यते। अन्या
र्थो वाच्यलक्ष्यव्यतिरिक्तः। व्यक्तिर्व्यञ्जनाकरणम्प्रसन्नैः प्रतिभाजुषां इत्यनेन नवनवो
न्मेषशालिनी प्रज्ञा प्रतिभा प्राग्भववासनेत्युच्यते तस्यां सत्यामेव वक्त्रवैशिष्ट्यादिसत्वेपि व्यं
ग्यप्रतीतिरिति प्रतिपादितं अत एव वैयाकरणादीनां न तथा रसप्रतीतिः यथाक्रममु
दाहरणानि अयि पिअकुले जलकुंभं घेत्तूण समागअ म्हि सहि तुरिअं। अमसेअसलिल
णी मासणी सहा विसमाण्पि रवणं। अत्र वक्त्री कामिनी तस्या दुःशीलत्वरूपवैशिष्ट्यं वि
जानतां चौर्यरतगोपनं व्यक्तिर्भवति। ओणिद्दं दोब्बल्लं चिन्ता अलसत्तणं सणीससिअं।

रसवि०

५२

महमंमरभाईली एकेरंसहितुहवि अहहपरिहवइ। अत्र दूतीप्रति पाद्यात्तस्या अन्य
दापि दृष्टदुष्टचेष्टायावैशिष्ट्येनं तस्याः कामुकोपभोगो व्यज्यते। तथाभूतां दृष्ट्वा नृपस
दसि पांचालतनयां वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः विराटस्यावसे स्थितमनु
चितारंभनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु। खेदो मासस्थे। अत्र खेदं म
यि भजति नाद्यापि कुरुष्विति काकोर्वैशिष्ट्यान्ममयिनयोग्यं कुरुषु पुनर्योग्यं मास्मयें इति
व्यज्यते। तई आमह गंडत्थलणिमिअं दिट्ठं णलेसि अण्णत्तो। एण्हिं सच्चेअ अहं ते अ
कओल्लाणेसा दिट्ठी। वाक्यमनेकपदं तेनात्र तदेशार्थिनी पदात्मकवाक्यवैशिष्ट्यात्स
खीकपोलप्रतिबिंबितां पश्यतस्ते दृष्टिरन्या दृगूपं वा भूत्। चलितायां त्वत्तस्यां अन्या
दृशी ताहेप्रच्छन्नकामुकत्वं नवेनिव्यज्यते। उअणिच्चलणिप्पंदा भिसिणीपत्तम्मि रेहइ शिवः
इबलाआणिम्मलमरगअभायणपरिट्ठिआसंखसुत्तिव्व। अत्र निश्चलनिष्पंदेति ५२
बालाकाराजतद्रूपात्मकवाक्यवैशिष्ट्यात्त्व बलाकाया आश्वस्तत्वं तेन निर्जनत्वं

।सिंहे चास्मास्त्वनेरस्त्सने स्वरूपस्तिवाचः प्रसारनिवारणेन कोलाहलरहिते काले समणं
तव्यमिति संकोचितदेशलतिरित्यनेनयाशितोषिकमालिंगनं तेकरोमीति व्यज्यते।इत्येषूदा
हरणेषु सर्वत्रार्थमात्रे व्यंजनेस्त्यभिधातो भिन्नावाच्योर्थः शक्तिज्ञानवद्भिरवगम्यते व्यं
ग्यस्तु सहृदयैरेवेति बोधभेदोपि व्यंजनायां। निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरागोऽ
धरो नेत्रे दूरमनंजने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि दूति बांधवजनस्याज्ञात
पीडागमे वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यांतिकं इत्यत्र तदंतिकं न गतासीति
निषेधः शब्दार्थः। गंतासि तदंतिकं रंतुमिति विधिर्व्यंग्य इत्यर्थस्वरूपभेदोप्यभिधा
व्यंजनयोः किं च गतोऽस्तमर्क इत्यादौ वाच्यार्थ एव प्रतीयते व्यंग्यस्तु तत्र तत्र प्रतिपत्त्रा
दिभेदेननैनो वभासते तथा हि राज्ञः सेनापतीन् प्रति शत्रूणां हद्दे नात्र मर्दनावसर इति हू
तीनामभिसारिकां प्रत्यभिसरणं उपक्रम्यतामिति सख्याचारज्ञो प्रति प्राप्तस्ते प्रेयानिति।क
र्मकरस्य सह कर्मकुर्वाणं प्रति कर्मकरणान्निवर्त्तामहे इति।भक्तस्य धार्मिकं प्रति सांध्यो

रसवि॰
५४

विधिरूपअन्यस्य नामिति । आगतस्य कार्यवशेन बहिर्गच्छंतं प्रति दूरं मा गा इति गृहिणी गोपा
लं प्रति सुरभयो गृहं प्रवेश्यंतामिति दिवसेऽतिसतप्तस्य बंधून्प्रति संतापोऽधुना न भव
तीति । आपणिकानां भ्रत्यान्प्रति विक्रेयवस्तूनि संक्रियंतामिति नायकागमनप्रस्तावे
प्रोषितभर्तृकायास्तत्कथकं प्रति नागतोद्यापि यानिति निरवधिर्व्यंग्यार्थः प्रकान्तेवा
च्यस्य विकल्पेवेत्यभिधाव्यंजनयोरर्थसंख्याभेदकृद्भेदः । वाच्यार्थः शब्दोच्चारणमात्रादेव प्र
तीयते व्यंग्यवस्तु प्रतिभानैर्मल्यादिति निमित्तभेदः । वाच्यस्य चमत्कारकारी व्यंग्यवस्तु प्रतीत
मात्रश्चमत्कारकारी कार्यभेदः । वाच्यः केवलप्रतीतौ कोऽव्यंग्यवस्तु चमत्कारिप्रतीतिकृद्
ति प्रतीतिभेदः । वाच्यः पूर्वं व्यंग्यः पश्चात्प्रतीयत इति कालभेदः । अभिधायाः शब्दाश्रया
व्यंजनायास्तु पदतदेकदेशतदर्थवाक्यतदर्थवर्णितरूतसौकुमार्यकाविन्यादि विशेषरचना शिवः
द्याश्रयेत्याश्रयभेदः । कस्स वण होइ रोसो दट्ठुण पिआए सवणं अहरं सभमरपउमाघ्रा ५४
इणि वारिअवामि सहसु एण्हिं अत्र नेदं उपपसधरदंशकृतमपि तु सभ्रमरपद्माघ्राण

जनितमितिकांतः नैतावन्नाम कृत्यमन्यदा विधेयं एतत्तु यथा कथंचित्समाहितं इतिकां
ताचकया याचित्यति पाद्यत इति विषय भेदः । किंच रसनात्मव्यापाराभिन्नरसादिपदप्र
तिपाद्यप्रमाणं तर सिद्धरसाभावाच्च न तत्र ऽभिधा पूर्वसिद्धमेव हि घटादिकमभिधया
बोध्यते अत एव लक्षणापि न व्यंग्यबोधनक्षमा मुख्यार्थबाधाद्यभावात् च । नहि शू
न्यं वासगृहमित्यादौ मुख्यार्थबाधः । न वा तद्योगः असंबद्धस्यात्मन एव व्यंग्यत्वात् न च
रसे व्यंग्ये प्रयोजनांतरं स्वस्यैव प्रयोजनरूपत्वात् गंगायां घोष इत्यादौ च प्रयोजनस्यापि
लक्ष्यत्वे ऽनवस्थाप्रसंगात् । न च तद्विशिष्टे लक्षणा विषयप्रयोजनयोर्युगपत्प्रतीत्यनभ्यु
पगमात् घटादि । ज्ञानानंतरं प्रयोजनीभूतज्ञाततायाः अनुव्यवसायेनैव ग्रहात् । ननु शू
न्यं वासगृहमित्यादौ ऽभ्युपगम्यते तावदभिधावादि पदानां रसप्रतीतौ तात्पर्यं अन्यथा नि
ष्प्रयोजनत्वात् तन्निर्वाहश्च लक्षणया । तथाहि । चुंबनालिंगनादि चेष्टानां रत्यादिभि
: सह ऽविनाभावो दृष्टः ते चुंबनादयः काव्ये ऽभिधीयमाना रत्यादिकं लक्षयंति अभिधे

रसवि० याविनाभूतस्प्रतीतिर्लक्षणोच्यते इति लक्षणाल्लक्षणात् । लक्षितश्च रत्यादि वाक्यार्थः प्राधा
न्येन बोध्यत्वात् । यदाहुः वाच्यप्रकरणादिभ्यो बुद्धिस्था वा यथाक्रिया वाक्यार्थः । कारयै
५५ र्युक्ताः स्थायी भावस्तथेतरैरिति । इतरैर्विभावादिभिः लक्षणानभिमानस्तु मुख्यार्थानवधारणा
55 त् । किंच मुख्यार्थबाधाभावे पितात्पर्यानुपपत्तितः यष्टीः प्रवेशयेत्यादौ लक्षणांगीकृताऽऽ
खिलैरिति चेन्नैवं । प्रमाणान्तरसिद्धे हि सति रसे तद्विषयकतात्पर्यान्यथानुपपत्त्या लक्षणां
गीकार्या तदेव न यतो रसस्यात्मस्वरूपत्वेन स्वप्रकाशतया स्वात्मसंवेदनसिद्धत्वं व्यंजनाचा
वरणभंगेनोपयुक्ता । किंच लक्षणा तावद्द्विविधाऽर्थान्तरसंक्रमितवाच्याऽत्यंतितिरस्कृतवा
च्या च । तत्राद्या तु नैव । यत्र हि मुख्यार्थः स्वेन रूपेणानुपयोगबाधितो रूपान्तरेणान्वे
ति तत्रार्थान्तरसंक्रमः । यथा रामोऽस्मि सर्वं सहे है वैदेहि हा तु कथं भविष्यतीत्यत्र हि रामत्वमात्र शिवः
मनाकांक्षितं वक्तृत्वेनैव तद्ग्रहाभावात् श्रुतौ राज्यपरित्यागवनवासादिदुःखसहस्रवि ५५
शिष्टे लक्षणा । एवं रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं इत्यत्र रामपदेन ताऽऽ

कादिहं तात्लक्ष्यते एवंरामस्य गात्रमसिद्धुर्वहगर्भखिन्नं सीताप्रवासनपटोरित्यनेनन्तृशं
सोऽलक्ष्यते अत्यंततिरस्कृतवाच्यस्य सर्वथैवान्वयेऽप्रवेशात् । उपनीतं बकुनमित्यत्र
एवंचहृतीयापिनैवविभावादीनामनुप्रयोगाभावात् अन्वयेसर्वथैवप्रवेशाभावाच्चत्र
थमुख्यप्रयोगे चमत्काराभावेन रसदोषप्रसंगात् न मुख्यः प्रयोगः किंतु विभावादिवाचक
पदानां निरूढलक्षणेति चेत् सर्वेषां रसप्रत्ययप्रसंगः । वस्तुतस्तु मुख्यार्थबाधाद्यभावेपि
प्रत्यायिकाद्दृष्टिरतिरिक्तैव भवितुमर्हतीति मात्सर्यमात्रात्तु लक्षणोच्यते भवद्भिः ननु भव
त्वनुमानं रसस्य प्रत्यायकं । तथा हि विभावानुभावव्यभिचारिप्रतीतिस्तावद्रसप्रतीतेः
साधनाभिष्यते ते हि कार्यकारणसहकारिभूता रत्यादीननुमापयंत एव संनिष्पादयंतीति
एव हि प्रतीयमाना आस्वादपदवीमुपेता रसा इत्युच्यते इत्येवंरूपमुपेयत इति चेन्न रसस्या
नंदमयत्वेन व्याप्तिग्रहाभावात् अथ यत्र यत्र विभावाद्यभिधानं तदभिनयो वा तत्र शृं
गारादिरसाविर्भाव इत्यस्ति व्याप्तिग्रहः न चाऽपि पिफुल्लं जलकुंभं धत्ते तूणसमाणदम्मि

रस० सहिउरअं समसे अ सहिलिअ ली सासली सहावि समामि सेवलं इत्यत्र चौर्यरतगोपनेव्यं
५६ ग्य वक्त्रादिवैशिष्ट्यापेक्षात् अन्यथा कुलांगनोक्तावपि तथा प्रत्ययः स्यात् । अनुमाने
त्वनेवं तत्र हेतुमात्रस्यापेक्षणादिति वाच्यं अनुमानपक्षेऽपि विशिष्टस्यैवाव्यभिचा
56 रिलिंगत्वेन तदुपयोगात् अत एवाहुः । योऽर्थान्तराभिव्यक्तौ वः सामग्रीष्टा निबंधनं
। सैवानुमानपक्षे गमकत्वेन संमतेति चेन्न । एवं हि रसादिभावानुमानं न तु रसा
स्वादोऽनुमित्यात्मकः द्रुतरूपते च व्याप्तिपक्षधर्मताज्ञानस्य विलंबवैधुर्ये वा सत्यपि वास
नावतां हि तिस प्रसयइति किंचिदेतत् । ननु अभिधामूलकं व्यंग्ये ऽभिधयैव व्यंग्य
प्रतीतिसिद्धेरार्थिकावृत्त्यंतरकल्पना न च करणादिनाएकार्थे तन्नियंत्रणान्न तत्र
तस्याः प्रसार इति वाच्यं तात्पर्यस्यावगूपकत्वात् । अन्यथा तादृशाका व्यार्थकवी शिव०
नां पदविशेषान्वेषणं न स्यात् न च सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायात् ५६
न्नार्थद्वयस्य युगपत्प्रतीतिः प्रतीतिक्रमे तु विरम्य व्यापाराभाव इति वाच्यं सकृदु

च्चरितादपिसति तात्पर्ये येन ध्वस्तमनोभवेनेत्यादौ युगपदर्थद्वयबोधात् भवतुवा
ऽभिधया अबोधकत्वं अवाच्यैकपदवाच्यत्वसंबंधेन लक्षणैव स्यान्नतु व्यंजनेति
चेन्न क्रमिकार्थबोध एवतात्पर्याद्युगपद्बोधासंभवात् क्रमिकबोधे च विरम्यव्यापा
राभावात् अभिधयानियन्त्रणात् मुख्यार्थबाधाभावेन लक्षणाया अप्यभावा
च्चतत्र व्यंजनासिद्धिः किंच द्वितीयार्थे यद्यभिधा लक्षणे तथापि तदुपमालंकारप्रती
तयेऽवश्यस्वीकार्यं व्यंजनांतरादेव तत्प्रतीतिसिद्धौ अभिधयाऽन्यथासिद्धिः निःशेषच्यु
तचंदनं इत्यत्र स्नानसाधारण्येन निबद्धानां विशेषणानामाभासत्वेनानुमापकत्वमपितु
अधमपदसाहचर्येण व्यंजकत्वमेव तदंतिकं रंतुं गतासीत्यस्येति नानुमानं किंच अनुमानं
परार्थमिव स्वार्थं पंचरूपत्वात् तत्र च साध्यसाधननिर्देशः नचात्र तथा साध्यादिरनुपा
दानात् नापि प्रतीयमानेष्वेकमवच्छेदकं येन रूपेण व्यापकभानं भवेत् नवा तावतां विशेषणा
नां एकसमूहालंबनानुसंधानसंभवः येन समूहालंबनात्मिकाऽनुमितिः स्यात् व्यंजना

रस० यःपुनरेतैर्निश्चितविशेषाणामनेकेषांपानकरसन्यायेनप्रतीतिरितिनासुपपत्तिः।नव्या
५७ स्तुवल्लैतज्जतसौकुमार्यादिविशेषरचनाविशेषचेष्टादीनांव्यंजनयैवतावदर्थबोधकत्वं
57 वाच्यंसर्वत्रविशेषेष्वनुमानासंभवात्तयाचसिद्धेतिरिक्तेव्यापारेशब्दादप्यर्थविशे
षप्रतीतिर्लक्षणादिप्रयोज्यप्रतीतिविलक्षणातत्प्रयोज्यैववाच्याकदाचित्सुनर्लक्ष
णादिकमपेक्षतांवानःक्षतिःसर्वथाविलक्षणप्रतीत्युपपादनायातिरिक्तवृत्तिस्वी
कारउत्याकृतिरितिकुन्तलं॥ ॥इतिश्रीमत्कुलभूदेवविरचितेरसविलासेव्यञ्जनानिर्ण
योनामसप्तमस्तबकः॥ ॥श्रीकंचदीक्षितेस्रोऽर्जिताकाव्यप्रकाशिका।इत्यावेदितम
स्माभिर्नवंनात्रप्रकाशितम् १ जंबूरसरक्षितिजुषःश्रुकदेवसूरेर्भूदेवपंडितकविः
प्रथमस्तनूजः।तन्निर्मितोरसविलासपदाभिधेयःसंदर्भएषकृतिनांमुदमातनोतु
॥२॥ ॥संवत्१८८९ माघकृष्ण॥ भृगुवासरे॥ ॥श्रीशुभमस्तु॥ ॥ ।५७॥